एवमुपपादितारंभंस्तस्यांतरंवक्रमुपक्रमतेवरुणास्येत्यादिना वरुणस्यशुक्रानज्येष्ठावलंपुत्रंसुरांचपुत्रीमसृजायनेनेतिसंबंधः ५२ ५३ ५४

वरुणस्यभार्यायाज्येष्ठाशुक्रादेवीव्यजायत तस्याःपुत्रंबलंविद्धिसुरांचसुरनंदिनी ५१ प्रजानामन्नकामानामन्योन्यपरि
भक्षणात् अधर्मस्तत्रसंजातःसर्वभूतविनाशकः ५३ तस्यापिनिर्ऋतिर्भार्यानैर्ऋतायेनराक्षसाः घोरास्तस्याःस्त्रयःपु
त्रापापकर्मरताःसदा ५४ भयोमहाभयश्चैवमृत्युर्भूतांतकस्तथा नतस्यभार्यापुत्रोवाकश्चिदस्त्यंतकोहिसः ५५ काकीं
श्येनींतथाभासींधृतराष्ट्रींतथाशुकीं ताम्रातुसुषुवेदेवीपंचैतालोकविश्रुताः ५६ उलूकान्सुषुवेकाकीश्येनीश्येनान्व्य
जायत भासीभासानजनयद्गृध्रांश्चैवजनाधिप ५७ धृतराष्ट्रीतुहंसांश्चकलहंसांश्चसर्वशः चक्रवाकांश्चभद्रातुजन
यामाससैवतु ५८ शुकीचजनयामासशुकानेवयशस्विनी कल्याणगुणसंपन्नासर्वलक्षणपूजिता ५९ नवक्रो
धवशानारीःप्रजज्ञेक्रोधसंभवाः मृगीचमृगमंदाचहरीभद्रमनाअपि ६० मातंगीत्वथशार्दूलीश्वेतासुरभिरेवच
सर्वलक्षणसंपन्नासुरसाचैवभामिनी ६१ अपत्यंतुमृगाःसर्वेमृग्यानरवरोत्तम ऋक्षाश्चमृगमंदायाःसृमरा
श्चपरंतप ६२ ततस्त्वैरावतंनागंजज्ञेभद्रमनाःसुतं ऐरावतःसुतस्तस्यादेवनागोमहागजः ६३ हर्याश्चहरयोपत्यं
वानराश्चतरस्विनः गोलांगूलांश्चभद्रंतेहर्याःपुत्रान्प्रचक्षते ६४ प्रजज्ञेत्वथशार्दूलीसिंहान्व्याघ्राननेकशः
द्वीपिनश्चमहासत्वान्सर्वानेवनसंशयः ६५ मातंग्यपिचमातंगानपत्यानिनराधिप दिशांगजंतुश्वेताख्यंश्वेताज
नयदाशुगं ६६ तथादुहितरौराजन्सुरभिर्वैव्यजायत रोहिणींचैवभद्रांतुगंधर्वींतुयशस्विनीं ६७ ॥ ॥

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ॥ ६७ ६७ ॥

आः
१३६

पिंडफलान्सप्तवर्ज्जूरतालहिंतालौतालीखर्ज्जूरीकांतथागुवाकोनारिकेलश्चसप्तपिंडफलाद्रुमाहस्पुक्तरूपान्हस्पुराणांतरविरोधानामभे

विमलामयिमहंते अनलामपिमारत रोहिण्यांजज्ञिरेगावोगंधर्व्यावाजिनःसुताः सप्तपिंडफलान्वृक्षाननलापिव
जायत ६८ अनलायाःशुकीपुत्रीकंकस्तुसुरसासुतः अरुणस्यभार्याश्येनीतुवीर्यवंतौमहाबलौ ६९ संपातिंजन
यामासवीर्यवंतंजटायुषं सुरसाजनयन्नागानकद्रूःपुत्रांस्तुपन्नगान् ७० द्वौपुत्रौविनतायास्तुविख्यातौगरुडारु
णौ इत्येषसर्वभूतानांमहतांमनुजाधिप प्रभवःकीर्तितःसम्यङ्मयामतिमतांवर ७१ यंश्रुत्वापुरुषःसम्यङ्मुक्तो
भवतिपाप्मनः सर्वज्ञतांचलभतेगतिमग्र्यांचविंदति ७२ इत्यादिपर्वणिअंशावतरणे जनमेजयउवाच देवानांदा
नवानांचयक्षाणामथरक्षसां सिंहव्याघ्रमृगाणांचपन्नगानांपतत्रिणां १ सर्वेषांचैवभूतानांसंभवंभगवन्नहं श्रोतु
मिच्छामितत्त्वेनमानुषेषुमहात्मनां जन्मकर्मचभूतानामेतेषामनुपूर्वशः २ वैशंपायनउवाच मानुषेषुमनुष्येंद्रसं
भूतायेदिवौकसः प्रथमंदानवांश्चैवतांस्तेवक्ष्यामिसर्वशः ३ विप्रचित्तिरितिख्यातोयआसीद्दानवर्षभः जरासंध
इतिख्यातःसआसीन्मनुजर्षभः ४ दितेःपुत्रस्तुयोराजन्हिरण्यकशिपुःस्मृतः सजज्ञेमानुषेलोकेशिशुपालोनर
र्षभः ५ संह्लादइतिविख्यातःप्रह्लादस्यानुजस्तुयः सशल्यइतिविख्यातोजज्ञेवाह्लीकपुंगवः ६ अनुह्लादस्तुतेज
स्वीयो विख्यातोजघन्यजः धृष्टकेतुरितिख्यातःसबभूवनरेश्वरः ७ यस्तुराजन्शिविर्नामदैतेयःपरिकीर्तितः द्रुमइ
तिविख्यातःसआसीद्भुविपार्थिवः ८ ॥

दास्कन्त्रभेदापाऽनेयः ६८ ६९ ७० ७१ अध्यायःदेवानामितिअध्यायोनिगदव्याख्यातः १ २ ३ ४ ६ ७ ८ ॥ ॥ ॥ रामः
१३६

बाष्कलोनामयस्तेषामासीदसुरसत्तमः भगदत्तइतिख्यातःसजज्ञेपुरुषर्षभः ९ अयःशिराअश्वशिराःअयःशंकुश्चवीर्य
वान् तथागगनमूर्द्धाचवेगवांश्चात्रपंचमः १० पंचैतेजज्ञिरेराजन्वीर्यवंतोमहासुराः केकयेषुमहात्मानःपार्थिवर्षभ
सत्तमाः केतुमानितिविख्यातोयस्ततोन्यःप्रतापवान् ११ अमितौजाइतिख्यातःसोग्रकर्मानराधिपः स्वर्भानुरितिविख्या
तःश्रीमान्यस्तुमहासुरः १२ उग्रसेनइतिख्यातउग्रकर्मानराधिपः यस्त्वश्वइतिविख्यातःश्रीमानासीन्महासुरः १३ अ
शोकोनामराजाभून्महावीर्योपराजितः तस्मादवरजोयस्तुराजन्नश्वपतिःस्मृतः १४ दैतेयःसोभवद्राजाहार्दिक्योम
नुजर्षभः वृषपर्वेतिविख्यातःश्रीमान्यस्तुमहासुरः १५ दीर्घप्रज्ञइतिख्यातःपृथिव्यांसोभवन्नृपः अजकस्त्ववरोराजन्य
आसीद्वृषपर्वणः १६ सशाल्वइतिविख्यातःपृथिव्यामभवन्नृपः अश्वग्रीवइतिख्यातःसत्ववान्योमहासुरः १७ रोचमा
नइतिख्यातःपृथिव्यांसोभवन्नृपः सूक्ष्मस्तुमतिमान्राजन्कीर्त्तिमान्यःप्रकीर्त्तितः १८ बृहद्रथइतिख्यातःक्षितावासी
त्सपार्थिवः तुहुंडइतिविख्यातोयआसीदसुरोत्तमः १९ सेनाबिंदुरितिख्यातःसबभूवनराधिपः इषुपोनामयस्तेषा
मसुराणांबलाधिकः २० नग्नजिन्नामराजासीद्भुविविख्यातविक्रमः एकचक्रइतिख्यातआसीद्यस्तुमहासुरः २१ प्र
तिविंध्यइतिख्यातोबभूवप्रथितःक्षितौ विरूपाक्षस्तुदैतेयश्चित्रयोधीमहासुरः २२ चित्रधर्मेतिविख्यातःक्षितावासी
त्सपार्थिवः हरस्त्वरिहरोवीरआसीद्योदानवोत्तमः २३ सुबाहुरितिविख्यातःश्रीमानासीत्सपार्थिवः अहरस्तुमहातेजाः
शत्रुपक्षक्षयंकरः २४ बाह्लीकोनामराजासबभूवप्रथितःक्षितौ निचंद्रश्चंद्रवक्त्रस्तुयआसीदसुरोत्तमः २५ मुंजके
शइतिख्यातःश्रीमानासीत्सपार्थिवः निकुंभस्त्वजितःसंख्येमहामतिरजायत २६ भूमौभूमिपतिश्रेष्ठोदेवाधिपइतिस्मृतः
शरभोनामयस्तेषांदैतेयानांमहासुरः २७ पौरवोनामराजर्षिःसबभूवनरोत्तमः कुपथस्तुमहावीर्यःश्रीमान्राजन्म

सी२

हासुरः सुपार्श्वइतिविख्यातःक्षितौजज्ञेमहीपतिः अयस्त्वराजन्राजर्षिःक्षितौजज्ञेमहासुरः २९ पार्वतेयइतिख्यातःकां
चनाचलसन्निभः द्वितीयःशलभस्तेषामसुराणांबभूवह ३० प्रह्लादोनाममाबाह्लीकःसबभूवनराधिपः चंद्रस्तुदितिजश्रेष्ठो
लोकेताराधिपोपमः ३१ चंद्रवर्मेतिविख्यातःकांबोजानांनराधिपः अर्कइत्यभिविख्यातोयस्तुदानवपुंगवः ३२ ऋ
षिकोनामराजर्षिर्बभूवनृपसत्तमः मृतपाइतिविख्यातोयआसीदसुरोत्तमः ३३ पश्चिमानूपकंविद्धितंनृपंनृपसत्तमः
गविष्ठस्तुमहातेजायःप्रख्यातोमहासुरः ३४ द्रुमसेनइतिख्यातःपृथिव्यांसोभवन्नृपः मयूरइतिविख्यातःश्रीमान्यस्तुमहा
सुरः ३५ सविश्वइतिविख्यातोबभूवपृथिवीपतिः सुपर्णइतिविख्यातस्तस्मादवरजस्तुयः ३६ कालकीर्तिरितिख्या
तःपृथिव्यांसोभवन्नृपः चंद्रहंतेतियस्तेषांकीर्तितःप्रवरोसुरः ३७ शुनकोनामराजर्षिःसबभूवनराधिपः विनाशन
स्तुचंद्रस्ययआख्यातोमहासुरः ३८ जानकिर्नामविख्यातःसोभवन्मनुजाधिपः दीर्घजिह्वस्तुकौरव्ययउक्तोदानव
र्षभः ३९ काशिराजःसविख्यातःपृथिव्यांपृथिवीपते ग्रहंतुसुषुवेयंतुसिंहिकार्केन्दुमर्दनं सक्राथइतिविख्यातोबभू
वमनुजाधिपः ४० अनायुषस्तुपुत्राणांचतुर्णांप्रवरोसुरः विक्षरोनामतेजस्वीवसुमित्रोनृपःस्मृतः ४१ द्विती
योविक्षराद्यस्तुनराधिपमहासुरः पांशुराष्ट्राधिपइतिविख्यातःसोभवन्नृप ४२ बलीनरइतिख्यातोयस्त्वासीद
सुरोत्तमः पौंड्रमत्स्यकइत्येवंबभूवसनराधिपः ४३ वृत्रइत्यभिविख्यातोयस्तुराजन्महासुरः मणिमान्नामरा
जर्षिःसबभूवनराधिपः ४४ क्रोधहंतेतियस्तस्यबभूवावरजोसुरः दंडइत्यभिविख्यातःसआसीन्नृपतिःक्षि
तौ ४५ क्रोधवर्द्धनइत्येवयस्त्वन्यःपरिकीर्तितः दंडधारइतिख्यातःसोभवन्मनुजर्षभः ४६ कालेयानांतुयेपुत्रास्ते

षामस्येनराधिपाः जज्ञिरेराजशार्दूल शार्दूलसमविक्रमाः ४७ मगधेषुजयत्सेनस्तेषामासीत्सपार्थिवः अष्टानांप्रवर
स्तेषांकालेयानांमहासुरः ४८ द्वितीयस्तुततस्तेषांश्रीमान्हरिहयोपमः अपराजितइत्येवंसबभूवनराधिपः ४९
तृतीयस्तुमहातेजामहामायोमहासुरः निषादाधिपतिर्जज्ञेभुविभीमपराक्रमः ५० तेषामन्यतमोयस्तुचतुर्थः
परिकीर्त्तितः श्रेणिमानितिविख्यातःक्षितौराजर्षिसत्तमः ५१ पंचमस्त्वभवत्तेषांप्रवरोयोमहासुरः महौजाइतिवि
ख्यातोबभूवेहपरंतपः ५२ षष्ठस्तुमति
मान्योवैतेषामासीन्महासुरः अभीरुरितिविख्यातःक्षितौराजर्षिसत्तमः ५३ समुद्रसेनस्तुनृपस्तेषामेवाभवद्गुणात् वि
ख्यातःसागरांतायांक्षितौधर्मार्थतत्त्ववित् ५४ बृहन्नामाष्टमस्तेषांकालेयानांनराधिप बभूवराजाधर्मात्मासर्वभूत
हितेरतः ५५ कुक्षिस्तुराजन्विख्यातोदानवानांमहाबलः पार्वतीयइतिख्यातःकांचनाचलसंनिभः ५६ क्रथनश्च
महावीर्यःश्रीमान्राजामहासुरः सूर्याक्षइतिविख्यातःक्षितौजज्ञेमहीपतिः ५७ असुराणांतुयःसर्पःश्रीमांश्चै
वमहासुरः दरदोनामबाह्लीकोवरःसर्वमहीक्षितां ५८ गणःक्रोधवशोनामयस्तेराजन्प्रकीर्त्तितः ततःसंजज्ञि
रेवीराःक्षिताविहनराधिपाः ५९ मद्रकःकर्णवेष्टश्चसिद्धार्थःकीटकस्तथा सुवीरश्चसुबाहुश्चमहावीरोथबाह्लिकः
६० क्रथोविचित्रःसुरथःश्रीमान्नीलश्चभूमिपः चीरवासाश्चकौरव्यभूमिपालश्चनामतः ६१ दंतवक्त्रश्चनामासीद्दु
र्जयश्चैवदानवः रुक्मीचनृपशार्दूलोराजाचजनमेजयः ६२ आषाढोवायुवेगश्चभूरितेजास्तथैवच एकलव्यः
सुमित्रश्चवाटधानोथगोमुखः ६३ कारूषकाश्चराजानःक्षेमधूर्त्तिस्तथैवच श्रुतायुरुद्वहश्चैवबृहत्सेनस्तथैवच

आ
१२८

६४ क्षेमोग्रतीर्थः कुहरः कलिंगेषु नराधिपः मतिमांश्च मनुष्येंद्र ईश्वरश्चेति विश्रुतः ६५ गणात्क्रोधवशादेष राजपूगो
भवत्क्षितौ जातः पुरमहाभागो महाकीर्त्तिर्महाबलः ६६ कालनेमिरिति ख्यातो दानवानां महाबलः स कंस इति विख्यात
उग्रसेनसुतो बली ६७ यस्त्वासीद्देवको नाम देवराजसमद्युतिः स गंधर्वपतिर्मुख्यः क्षितौ जातो नराधिपः ६८ बृहस्पतेर्बृ
हत्कीर्त्तिर्देवर्षेर्विद्धि भारत अंशाद्द्रोणं समुत्पन्नं भारद्वाजमयोनिजं ६९ धन्विनां नृपशार्दूल यः सर्वास्त्रविदुत्तमः महाकीर्त्ति
र्महातेजाः स जज्ञे मनुजेश्वरः ७० धनुर्वेदे च वेदे च यं तं वेदविदो विदुः वरिष्ठं चित्रकर्माणं द्रोणं स्वकुलवर्द्धनं ७१ महादेवां
तकाभ्यां च कामात्क्रोधाच्च भारत एकत्वमुपपन्नानां जज्ञे शूरः परंतपः ७२ अश्वत्थामा महावीर्यः शत्रुपक्षक्षयावहः वी
रः कमलपत्राक्षः क्षितावासीन्नराधिप ७३ जज्ञिरे वसवस्त्वष्टौ गंगायां शंतनोः सुताः वसिष्ठस्य च शापेन नियोगाद्वास
वस्य च ७४ तेषामवरजो भीष्मः कुरूणामभयंकरः मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयंकरः ७५ जामदग्न्येन रामेण स
र्वास्त्रविदुषां वरः यो युध्यत महातेजा भार्गवेण महात्मना ७६ यस्तु राजन्कृपो नाम ब्रह्मर्षिरभवत्क्षितौ रुद्राणां तु ग
णाद्विद्धि संभूतमतिपौरुषं ७७ शकुनिर्नाम यस्त्वासीद्राजा लोके महारथः द्वापरं विद्धि तं राजन्संभूतमरिमर्द्दनं ७८ सात्य
किः सत्यसंधस्तु योसौ वृष्णिकुलोद्वहः पक्षात्स जज्ञे मरुतां देवानामरिमर्द्दनः ७९ द्रुपदश्चैव राजर्षिस्तत एवाभवद्गणात्
मानुषे नृपलोकेस्मिन्सर्वशस्त्रभृतां वरः ८० ततश्च कृतवर्माणं विद्धि राजन्नराधिपं तमप्रतिमकर्माणं क्षत्रियर्षभसत्तमं ८१
मरुतां तु गणाद्विद्धि संजातमरिमर्द्दनं विराटं नाम राजानं परराष्ट्रप्रतापनं अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः ८२
स गंधर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः— दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः

रामः
१२८

८६ अत्रेरितिमया प्रोक्तो दितो भास्करे भृत्प्रणष्टे सोम्य अत्रिर्भगवानाजगामे तस्य भास्करकार्यकारित्वस्मरणात् अत्रिशब्देन सूर्यो गृह्यते तेन सपुत्रे

मातुर्देषाद्दोषेकोपादेषएवव्यजायत ८५ तस्यैवावरजो भ्राता महासत्वो महाबलः सपार्दुरिति विख्यातः सत्यधर्म
रतः शुचिः ८६ अत्रेस्तु सुमहाभागं पुत्रं पुत्रवतां वरं विदुरं विद्धि तं लोके जातं बुद्धिमतां वरं ८७ कलेरंशस्तु संज
ज्ञे भुवि दुर्योधनो नृपः दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः ८८ जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः यः स
र्वां घातयामास पृथिवीं पृथिवीपते ८९ उद्दीपितं येन वैरं भूतानकरणं महत् पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजे
ष्विह ९० शतं दुःशासनादीनां सर्वेषां क्रूरकर्मणां दुर्मुखो दुःसहश्चैव ये चान्ये नानुकीर्त्तिताः ९१ दुर्योधनसहायास्
ते पौलस्त्या भरतर्षभ वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ९२ जनमेजय उवाच ज्येष्ठानुज्येष्ठतां मे
षां नामधेयानि वा विभो धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्त्तय ९३ वैशंपायन उवाच दुर्योधनो युयुत्सुश्च रा
जन् दुःशासनस्तथा दुःसहो दुःशलश्चैव दुर्मुखश्च तथापरः ९४ विविंशतिर्विकर्णश्च जलसंधः सुलोचनः विंद
नुविंदौ दुर्द्धर्षः सुबाहुर्दुःप्रधर्षणः ९५ दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च चित्रोपचित्रौ चित्राक्षश्चारुचि
त्रांगदश्च ह ९६ दुर्मदो दुःप्रहर्षश्च विविन्सुर्विकटः समः ऊर्णनाभः पद्मनाभस्तथा नंदोपनंदकौ ९७ सेनापति
तिः सुषेणश्च कुंडोदरमहोदरौ चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विरोचनः ९८ अयोबाहुर्महाबाहुश्चित्रचापसुकुं

धर्मविदुरं विद्धीत्यर्थः ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९ ॥ ॥ ॥ ॥

आ: १३६ उग्रायुधो भीमशरः कनकायुर्दृढायुधः दृढवर्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः १०० जरासंधो दृढसंधः सत्यसंधः सहस्रवा
क् उग्रश्रवा उग्रसेनः क्षेममूर्त्तिस्तथैव च १ अपराजितः पंडितको विशालाक्षो दुराधनः २ दृढहस्तः सुहस्तश्च वातवे
गसुवर्चसौ आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ ३ कवची निषंगी दंडी दंडधारो धनुर्ग्रहः उग्रो भीमरथो वीरो
वीरबाहुरलोलुपः ४ अभयो रौद्रकर्मा च तथा दृढरथाश्रयः अनाधृष्यः कुंडभेदी विरावी दीर्घलोचनः ५ दीर्घबाहु
र्महाबाहुर्व्यूढोरः कनकांगदः कुंडजश्चित्रकश्चैव दुःशला च शताधिका ६ वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधि
कः एतदेकशतं राजन् कन्या चैका प्रकीर्त्तिता ७ नामधेयानुपूर्व्या च ज्येष्ठानुज्येष्ठतां विदुः सर्वे त्वतिरथाः शूराः सर्वे युद्ध
विशारदाः ८ सर्वे वेदविदश्चैव राजन् शास्त्रेषु पारगाः सर्वे संग्रामविद्यासु विद्याभिजनशोभिनः ९ सर्वेषामनुरूपाश्च
कृता दारा महीपते दुःशलां समये राजन् सिंधुराजाय कौरवाः १० जयद्रथाय प्रददौ सौबलानुमते तदा धर्मस्यांशं तु राजा
नं विद्धि राजन् युधिष्ठिरं ११ भीमसेनं तु वातस्य देवराजस्य चार्जुनं अश्विनोस्तनयौ वीरौ रूपेणाप्रतिमौ भुवि १२ नकुलः स
हदेवश्च सर्वभूतमनोहरौ यस्तु वर्चा इति ख्यातः सोमपुत्रः प्रतापवान् १३ सोभिमन्युर्बृहत्कीर्त्तिरर्जुनस्य सुतोभवत् य
स्यावतरणे राजन् सुरान्सोमोब्रवीदिदं १४ नाहं दद्यां प्रियं पुत्रं मम प्राणैर्गरीयसं समयः क्रियतामेष न शक्यमतिवर्त्तितुं
१५ सुरकार्यं हि नः कार्यमसुराणां क्षितौ वधः तत्र यास्यत्ययं वर्चा न च स्थास्यति वै चिरं १६ ऐंद्रिर्नरस्तु भविता यस्य नाराय
णः सखा सोर्जुनेत्यभिविख्यातो पांडोः पुत्रः प्रतापवान् १७ तस्यायं भविता पुत्रो बालो भुवि महारथः ततः षोडश वर्षाणि
स्थास्यत्यमरसत्तमाः १८ अस्य षोडशवर्षस्य स संग्रामो भविष्यति यत्रांशा वः करिष्यंति कर्म वीरनिषूदनं १९ नरना राम: १३६

रायणाभ्यां तु संसंग्रामो विनाकृतः चक्रव्यूहं समासाद्य योधयिष्यति वः सुराः २० विमुखाञ्छात्रवान्सर्वान्कारयिष्यति
मे सुतः बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति २१ महारथानां वीराणां कदनं च करिष्यति सर्वेषामेव शत्रूणां चतुर्था
शं नयिष्यति २२ दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति ततो महारथैर्वीरैः समेत्य बहुशो रणे २३ दिनक्षये महाबाहुर्म
या भूयः समेष्यति एकं वंशकरं पुत्रं वीरं वै जनयिष्यति २४ प्रणष्टं भारतं वंशं स भूयो धारयिष्यति एतत्सोमवचः श्रुत्वा त
थास्त्विति दिवौकसः २५ प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन् एवं ते कथितं राजंस्तव जन्म पितुः पितुः २६ अग्ने
र्भागं तु विद्धि त्वं धृष्टद्युम्नं महारथं शिखंडिनमथो राजन्स्त्रीपुंसं विद्धि राक्षसं २७ द्रौपदेयाश्च ये पंच बभूवुर्भरतर्षभ
विश्वान्देवगणान्विद्धि संजातान्भरतर्षभ २८ प्रतिविंध्यः सुतसोमः श्रुतकीर्तिस्तथापरः नाकुलिश्च शतानीकः श्रु
तसेनश्च वीर्यवान् २९ शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत् तस्य कन्या पृथा नाम रूपेणासदृशी भुवि ३० पितुः
स्वस्त्रीयपुत्राय सोनपत्याय वीर्यवान् अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा ३१ अग्रजातेति तां कन्यां शूरोनुग्र
हकांक्षया अददत्कुंतिभोजाय सतां दुहितरं तदा ३२ सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने उग्रं पर्यचरद्घोरं ब्रा
ह्मणं शंसितव्रतं ३३ निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ३४ तुष्टोभिचा
रसंयुक्तमाचचक्षे यथाविधि उवाच चैनां भगवान्प्रीतोस्मि सुभगे तव ३५ यं यं देवं त्वमेतेन मंत्रेणावाहयिष्यसि त
स्य तस्य प्रसादात्त्वं देवि पुत्रान्लभिष्यसि ३६ एवमुक्ता च सा बाला तदा कौतूहलान्विता कन्या सती देवमर्कमाजुहा
व यशस्विनी ३७ प्रकाशकर्मा तपनस्तस्यां गर्भं दधौ तदा अजीजनत्सुतं चास्यां सर्वशस्त्रभृतां वरं ३८ सकुंडलं

सकवचं देवगर्भं श्रियान्वितं दिवाकरसमं दीप्त्या चारुसर्वांगभूषितं ३९ निगूहमाना जातं वै बंधुपक्षभयात्तदा उ
त्ससर्ज जले कुंती तं कुमारं यशस्विनं ४० तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः राधायाः कल्पयामास पुत्रं सो
धिरथस्तदा ४१ चक्रतुर्नामधेयं च तस्य बालस्य तावुभौ दंपती वसुषेणेति दिक्षु सर्वासु विश्रुतं ४२ स वर्द्धमा
नो बलवान्सर्वास्त्रेषूद्यतोऽभवत् वेदांगानि च सर्वाणि जजाप जपतां वरः ४३ यस्मिन्काले जपन्नास्ते धीमान्सत्यप
राक्रमः नादेयं ब्राह्मणेष्वासीत्तस्मिन्काले महात्मनः ४४ तमिंद्रो ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः ययाचे
कुंडले वीरं कवचं च सहांगजं ४५ उत्कृत्य कर्णो ह्यददत्कवचं कुंडले तथा शक्तिं शक्रो ददौ तस्मै विस्मितश्चेदम
ब्रवीत् ४६ देवासुरमनुष्याणां गंधर्वोरगरक्षसां यस्मिन्क्षेप्स्यसि दुर्द्धर्षः स एको न भविष्यति ४७ पुरा नाम च तस्
यासीद्वसुषेण इति क्षितौ ततो वैकर्तनः कर्णः कर्मणा तेन सोऽभवत् ४८ आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः
स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः ४९ स तु सूतकुले वीरो ववृधे राजसत्तमः कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृ
तां वरं दुर्योधनस्य सचिवं मित्रं शत्रुविनाशनं ५० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ धन्यंधनप्रदंयशसंपत्करं ६४

दिवाकरस्तंतं विद्धि राजन्नंशमनुत्तमं ५१ यस्तु नारायणो नाम देवदेवः सनातनः तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान्
५२ शेषस्यांशश्च नागस्य बलदेवो महाबलः सनत्कुमारं प्रद्युम्नं विद्धि राजन्महौजसं ५३ एवमन्ये मनुष्येंद्र बहवोंशा दि
वौकसां जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः ५४ गणस्त्वप्सरसां यो वै मया राजन्प्रकीर्त्तितः तस्य भागः क्षितौ जज्ञे नियो
गाद्वासवस्य ह ५५ तानि षोडश देवीनां सहस्राणि नराधिप बभूवुर्मानुषे लोके वासुदेवपरिग्रहः ५६ श्रियस्तु भागः
संजज्ञे रत्यर्थं पृथिवीतले भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः ५७ द्रौपदी त्वथ संजज्ञे शचीभागादनिंदिता द्रुप
दस्य कुले कन्या वेदिमध्यादनिंदिता ५८ नातिह्रस्वा न महती नीलोत्पलसुगंधिनी पद्मायताक्षी सुश्रोणी स्वसितांचि
तमूर्द्धजा ५९ सर्वलक्षणसंपूर्णा वैडूर्यमणिसन्निभा पंचानां पुरुषेंद्राणां चित्तप्रमथना रहः ६० सिद्धिर्धृतिश्च ये
द्वे पंचानां मातरौ तु ते कुंती माद्री च जज्ञाते मतिस्तु सुबलात्मजा ६१ इति देवासुराणां ते गंधर्वाप्सरसां तथा अंशावत
रणं राजन्राक्षसानां च कीर्त्तितं ६२ ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः महात्मानो यदूनां च ये जाता विपुले कुले
६३ ब्राह्मणाः क्षत्रिया वैश्यास्मया ते परिकीर्त्तिताः धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहं इदमंशावतरणं श्रोतव्यम
नसूयता ६४

६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥ ६४ ॥

आः १५१ प्रभवाप्ययः परमात्मा विश्वोत्पत्तिप्रलयाधिष्ठानत्वात् तं वेत्तीति प्रभवाप्ययवित् मूलेति शेषः कृच्छ्रेषु संसारगहनेषु अयं भावः यथा शास्त्रे
वियदादिसृष्टिः ब्रह्मोपादानकत्वलाघवेन प्रतिपत्त्यै कीर्तिता। वियदाद्यपादाद्योः सृष्टिश्रुतीनां परविरोधपरिहारश्च कीर्तितः तथापि सृष्टौ नान
र्थेनास्ति एवमिहापि नांशावतरणो नाम यथार्थमस्ति किंतु तद्द्वारा ब्रह्माद्वैतप्रतिपत्त्यै च वर्ण्यते। सृष्टिस्मृतीनां विरोधः कल्पभेदाभिप्रायेणावा वर्णनीयः
उपचरणीयो वा स्वार्थे तात्पर्याभावादिति दिक्। ६५ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनी

अंशावतरणं श्रुत्वा देवगंधर्वरक्षसां प्रभवाप्ययवित्प्राज्ञो न कृच्छ्रेष्ववसीदति ६५ इत्यादिपर्वणि अंशावतरणं समाप्तं जन
मेजय उ० च त्वत्तः श्रुतमिदं ब्रह्मन्देवदानवरक्षसां अंशावतरणं सम्यग्गंधर्वाप्सरसां तथा इमं तु भूय इच्छामि कुरूणां वंशमादि
तः कथ्यमानं त्वया विप्र विप्रर्षिगणसंनिधौ २ वैशंपायन उ० च पौरवाणां वंशकरो दुष्यंतो नाम वीर्यवान् पृथिव्याश्चतुर
ताया गोप्ता भरतसत्तम ३ चतुर्भागं भुवः कृत्स्नं यो भुंक्ते मनुजेश्वरः समुद्रावरणांश्चापि देशान्स समितिंजयः ४ आम्लेच्छा
वधिकान्सर्वान्स भुंक्ते रिपुमर्दनः रत्नाकरसमुद्रांतांश्चातुर्वर्ण्यजनावृतान् ५ न वर्णसंकरकरो न कृष्याकरकृज्जनः न पा
पकृत्कश्चिदासीत्तस्मिन्राजनि शासति ६ धर्मे रतिं सेवमाना धर्मार्थावभिपेदिरे तदा नरा नरव्याघ्र तस्मिञ्जनपदेश्वरे ७
नासीच्चौरभयं तात न क्षुधाभयमण्वपि नासीद्व्याधिभयं चापि तस्मिञ्जनपदेश्वरे ८ ॥ ॥ ॥ ॥

लकंठस्य कृतौ भारतभावदीपे ऽंशावतरणार्थप्रकाशः त्वत्त इति २ चतुरन्तायाः चतुःसमुद्रावच्छिन्नायाः ३ चतुर्भागं भागचतुष्कं सर्वमिति
यावत् ४ ५ न कृष्याकरकृत् न कृषिकृत् सुवोऽकृष्यपच्यत्वात्। आकरः सुवर्णादिधानत्वनिस्यानं तत्रापि यत्नेन करोति पृथिव्या रत्नैर्धातु आः १५१

दैवकर्मणि वृष्ट्याद्यर्थे कारीर्यादिकाम्यकर्मणि ९ तद्देवाहकालेति पशुमती वसुमतीति पाठे धनवती १० वज्रसंहननो दृढदेहः
११ सवनकाननं वनं जलं उपवनं वा सवल्गाः प्रक्षेपविक्षेपपरिक्षेपाख्याः पंथानो यस्मिन्तद्गदायुद्धं प्रक्षेपो दूरस्थस्य शस्त्रेण त्यागः विक्षेप

स्वधर्मरतिभिर्वर्णैर्दैवे कर्मणि निस्पृहैः तमाश्रित्य महीपालमासंश्चैवाकुतोभयाः ९ कालवर्षी च पर्जन्यः
सस्यानि रसवंति च सर्वरत्नसमृद्धा च मही पशुमती तथा १० स्वकर्मनिरता विप्रा नानृतं तेषु विद्यते स चा
द्भुतमहावीर्यो वज्रसंहननो युवा ११ उद्यम्य मंदरं दोर्भ्यां वहेत्सवनकाननं चतुष्पथगदायुद्धे सर्वप्रहरणेषु
च १२ नागपृष्ठेऽश्वपृष्ठे च बभूव परिनिष्ठितः बले विष्णुसमश्चासीत्तेजसा भास्करोपमः १३ अक्षोभ्यत्वे
ऽर्णवसमः सहिष्णुत्वे धरासमः संमतः स महीपालः प्रसन्नपुरराष्ट्रवान् १४ भूयो धर्मपरैर्भावैर्मुदितं जनमा
दिशत् १५ इत्यादिपर्वणि शाकुंतले जनमेजय उ० च संभवं भरतस्याहं चरितं च महामतेः शकुंतलाया
श्चोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः १ दुष्यंतेन च वीरेण यथा प्राप्ता शकुंतला तं वै पुरुषसिंहस्य भगवन्विस्तरं त्व
हं २ श्रोतुमिच्छामि तत्त्वज्ञ सर्वं मतिमतां वर वैशंपायन उ० च स कदाचिन्महाबाहुः प्रभूतबलवाहनः ३
वनं जगाम गहनं हयनागशतैर्वृतः बलेन चतुरंगेन वृतः परमवल्गुना ४ खड्गशक्तिधरैर्वीरैर्गदामुसल
पाणिभिः प्रासतोमरहस्तैश्च ययौ योधशतैर्वृतः ५

समीपस्थस्यैकोद्घातप्रहारः परिक्षेपो बहुषु सम्मेतासु भ्रमणेन शत्रूणां क्षेपः अभिक्षेपोऽग्रेण ताडनं १३ १४ आदिशत् शशा
स १५ शाकुंतलेऽध्याये ३ चतुरंगेन हस्त्यश्वरथपादातवता वल्गु रम्यं ४ ५ ॥

आः
१४२

८ परवारणां शत्रुगजानां निवारकं सिंहं ९ १० ११ १२ धूर्गतं सत्कं धाहतं १३ १४ १५ अपरयेन पौरपराहन्तमनंतरं १६ १७ १८

सिंहनादैश्च योधानां शंखदुन्दुभिनिःस्वनैः रथनेमिस्वनैश्चैव सनागवरबृंहितैः ६ नानायुधधरैश्चापि नानावेषधरै
स्तथा हेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः ७ आसीत्किलकिलाशब्दस्तस्मिन्नाच्छति पार्थिवे प्रासादवरशृं
गस्थाः परयानन्दशोभया ८ दृष्ट्वा सुतं स्त्रियस्तत्र शूरमात्मयशस्करं शक्रोपममित्रघ्नं परवारणवारणं ९
पश्यंतः स्त्रीगणास्तत्र वज्रपाणिं स्म मेनिरे अयं स पुरुषव्याघ्रो रणे वसुपराक्रमः १० यस्य बाहुबलं प्राप्य नभ
वन्सुहृद्गणाः इति वाचोऽब्रुवंस्तास्त्रियः प्रेम्णा नराधिपं ११ तुष्टुवुः पुष्पवृष्टीश्च ससृजुस्तस्य मूर्द्धनि त
त्रतत्र च विप्रेन्द्रैः स्तूयमानः समंततः १२ निर्ययौ परमप्रीत्या वनं मृगजिघांसया तं देवराजप्रतिमं मत्तवार
णधूर्गतं १३ द्विजक्षत्रियविट्शूद्रा निर्यान्तमनुजग्मिरे ददृशुर्वर्द्धमानास्ते आशीर्भिश्च जयेन च १४ सु
दूरमनुजग्मुस्ते पौरजानपदास्तथा न्यवर्त्तन्त ततः पश्चादनुज्ञाता नृपेण ह १५ सुपर्णप्रतिमेनाथ रथेन वसुधा
धिपः महीमापूरयामास घोषेण त्रिदिवं तथा १६ सगच्छन्ददृशे धीमान्नन्दनप्रतिमं वने बिल्वार्कखदिराकी
र्णं कपित्थधवसंकुलं १७ विषमं पर्वतस्रस्तैरश्मभिश्च समावृतं निर्जलं निर्मनुष्यं च बहुयोजनमायतं १८
मृगसिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः तद्वनं मनुजव्याघ्रः सभृत्यबलवाहनः १९ लोडयामास दुष्मंतः सत्त्व
न्विविधान्मृगान् बाणगोचरसंप्राप्तांस्तत्र व्याघ्रगणान्बहून् २० पातयामास दुःषंतो निर्बिभेद च साय
कैः दूरस्थान्सायकैः कांश्चिदभिनत्स नराधिपः २१ ॥

१९ २० २१ ॥ ॥

त५

राम०
१४२

२५ औत्सुक्यात्तवै मृगात २६ २७ संसाध्य पाकादिना संस्कृतम् २८ प्रकुपद्वर्गीकृत्सा गजाः वनगजाः २९ ३० ३१ अध्यायः १ अन्ते

अभ्यासमागतांश्चान्यान वृद्धेन निरकृंतत कांश्चिद्रोगान्समाजघ्ने शस्त्रा शक्तिमतांवरः २२ गदामंडलतत्वज्ञश्चचारामितवि
क्रमः तोमरैरसिभिश्चापि गदामुसलकंपनैः २३ चचारसविनिघ्नंश्च वन्यांस्तत्र मृगद्विजान् राजा वानुत्तवीर्यायोधैश्च
समरप्रियैः २४ लोड्यमानं महारण्यं तत्सजुः स्म मृगाधिपाः तत्रविद्रुतयूथानि हतयूथपतीनि च २५ मृगयूथान्य
पौत्सुक्याच्छब्दं चक्रुस्ततस्ततः शुष्कांश्चापि नदीर्गत्वा जलनैराश्य कर्षिताः २६ व्यायामक्लांतहृदयाः पतंति स्म वि
चेतसः क्षुत्पिपासापरीतांश्च श्रांतांश्च पतिता भुवि २७ केचित्तत्र नरव्याघ्रैरभक्ष्यंत बुभुक्षितैः केचिदग्निमथोत्साद्य
संसाध्य च वनेचराः २८ भक्षयंति स्म मांसानि प्रकुट्य विधिवत्तदा तत्र केचिद्गजा मत्ता बलिनः शस्त्रविक्षताः २९
संकोच्याग्रकरान्भीताः प्राद्रवंति स्म वेगिताः शकृन्मूत्रं सृजंतश्च क्षरंतः शोणितं बहु ३० वन्यागजवरास्तत्र मम
र्दुर्मनुजान्बहून् तद्वनं बलमेघेन शरधारासंवृतं व्यरोचत मृगाकीर्णं राज्ञा हतमृगाधिपं ३१ इत्यादिपर्वणि शा
कुंतले वैशंपायन उ च ततो मृगसहस्राणि हत्वा सबलवाहनः राजा मृगप्रसंगेन वनमन्यद्विवेश ह १ एक एवोत्तम
बलः क्षुत्पिपासाश्रमान्वितः स वनस्यांतमासाद्य महदूषरमासदत् २ तच्चाप्यतीत्य नृपतिरुत्तमाश्रमसंयुतं मनः
प्रह्लादजननं दृष्टिकांतमतीव च ३ शीतमारुतसंयुक्तं जगामान्यन्महद्वनं पुष्पितैः पादपैः कीर्णमतीवसुखशाद्वले ४
विपुलं मधुरारावैर्नादितं विहगैस्तथा पुंस्कोकिलनिनादैश्च झिल्लीकगणनादितं ५ ॥ ॥ ॥ ॥ ॥ ॥

वृक्षादिरहितं कुषरं २ ३ ४ ५ श्रीकृष्णोऽनुमपति ॥ ॥ ७ ७ ॥ ॥ ७ ॥ ॥ ॥

लक्ष्म्या शोभया ६ नाप्यपाकीर्णः अनावृतो न ७ ८ कुसुमवत्त्वात्पादपवंतः कुसुमशाखिनः ९ १२ महेंद्रध्वजे ध्वजाइव ध्वजाउच्चतरा वृक्षाः
तत्तुल्यैः इंद्रध्वजवदत्युच्चैर्वा १३ १४ गिरिसमारमपि तु मिश्रया १५ नदीकच्छोद्भवं कच्छः सजलोनूपप्रदेशः १६ १९ महाकच्छैः महत्सु तत्रैः

आ: १४३

प्रहृष्टविटपैर्हृद्यैः सुखच्छायैः समावृतं षट्पदाघूर्णितलतं लक्ष्म्या परमया युतं ६ नापुष्पः पादपः कश्चिन्नाफलो नापि
कंटकी षट्पदैर्वाप्यपाकीर्णस्तस्मिन्वै कानने भवत् ७ विहगैर्नादितं पुष्पैरलंकृतमतीव च सर्वर्तुकुसुमैर्हृद्यैः
सुखच्छायैः समावृतं मनोरमं महेष्वासो विवेश वनमुत्तमं ८ मारुताकलितास्तत्र द्रुमाः कुसुमशाखिनः पुष्पवृष्टिं
विचित्रां तु व्यसृजंस्ते पुनः पुनः ९ दिवस्पृशोथ संघुष्टाः पक्षिभिर्मधुरस्वनैः विरेजुः पादपास्तत्र विचित्रकुसुमांबराः
१० तेषां तत्र प्रवालेषु पुष्पभारावनामिषु रुवंति रावान्मधुरान्षट्पदा मधुलिप्सवः ११ तत्र प्रदेशांश्च बहून्कुसु
मोत्करमंडितान् लतागृहपरिक्षिप्तान्मनसः प्रीतिवर्द्धनान् संपश्यन्सुमहातेजा बभूव मुदितस्तदा १२ परस्पराश्लि
ष्टशाखैस्तैः पादपैः कुसुमान्वितैः अशोभत वनं तत्तु महेंद्रध्वजसन्निभैः १३ सिद्धचारणसंघैश्च गंधर्वाप्सरसां गणैः सेवितं
वनमत्यर्थं मत्तवानरकिन्नरैः १४ सुखः शीतः सुगंधी च पुष्परेणुवहोनिलः परिक्रामन्वने वृक्षानुपैतीव रिरंसया
१५ एवंगुणसमायुक्तं ददर्श स वनं नृपः नदीकच्छोद्भवं कांतमुच्छ्रितध्वजसंनिभं १६ प्रेक्षमाणो वनं तत्तु सुप्र
हृष्टविहंगमं आश्रमप्रवरं रम्यं ददर्श च मनोरमं १७ नानावृक्षसमाकीर्णं संप्रज्वलितपावकं तं तदाप्रतिमं श्री
मानाश्रमं प्रत्यपूजयत् १८ यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितं अग्न्यागारैश्च बहुभिः पुष्पसंस्तरसंस्तृ
तं १९ महाकच्छैर्बृहद्भिश्च विभ्राजितमतीव च मालिनीमभितो राजन्नदीं पुण्यां सुखोदकां २० ॥ ॥

बृहद्भिः पुष्टैः अथ कच्छस्यादत्नपेतत्तत्रतरुमेदतिमेदिनी। मालिनीं अभितः आश्रममध्येनैव मालिनीं गच्छति न तु प्रांतेन २० ॥ छ ॥

राम: १४३

२१ अप्रतिरथः अप्रतिमः २२ २५ काश्यपस्य कश्यपगोत्रस्य कण्वस्य ३६ ३७ वितनेषु वैतानिकेषु इष्टिपशुसोमादिषु प्रवर्तमानेषु ३८

नैकपक्षिगणाकीर्णं तपोवनमनोरमं तत्र आलम्बगान्नैम्यान्मधुपश्रीतिमवाप सः २० तं वाप्रतिरथः श्रीमानाश्रमं प्र
त्यपद्यत देवलोकप्रतीकाशं सर्वतः सुमनोहरं २२ नदीमाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः सर्वप्राणभृतां तत्र जननी
मिवाधिष्ठितां २३ सचक्रवाकपुलिनां पुष्पफेनप्रवाहिनीं सकिंनरगणावासां वानरर्क्षनिषेवितां २४ पुण्यस्वाध्या
यसंघुष्टां पुलिनैरुपशोभितां मत्तवारणशार्दूलभुजगेन्द्रनिषेवितां २५ तस्यास्तीरे भगवतः कश्यपस्य महात्मनः आश्रम
प्रवरं रम्यं महर्षिगणसेवितं २६ नदीमाश्रमसंबद्धां दृष्ट्वाश्रमपदं तथा चकाराभिप्रवेशाय मतिं स नृपतिस्तदा २७ अलंकृतं द्वीप
वत्या मालिन्या रम्यतीरया नरनारायणस्थानं गंगयेवोपशोभितं २८ मत्तबर्हिणसंघुष्टं प्रविवेश महद्वनं तत्स चैत्ररथप्रख्यं समुप
त्य नरर्षभः २९ अतीव गुणसंपन्नमनिर्देश्यं च वर्चसा महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनं ३० ध्वजिनीमश्वसंबाधां पदाति त्र
गजसंकुलां अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ३१ मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनं काश्यपं स्थीयतामत्र यावदाग
मनं मम ३२ तद्वनं नंदनप्रख्यमासाद्य मनुजेश्वरः क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलां ३३ सामात्यो राजलिंगानि सोपनी
य नराधिपः पुरोहितसहायश्च जगामाश्रममुत्तमं ३४ दिदृक्षुस्तत्र तमृषिं तपोराशिमथाव्ययं ब्रह्मलोकप्रतीकाशमाश्रमं
सोभिवीक्ष्य ह षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतं ३५ ऋचो बह्वृचमुख्यैश्च प्रेर्यमाणाः पदक्रमैः शुश्राव मनुजव्याघ्रो वि
ततेष्विह कर्मसु ३६ यज्ञविद्यांगविद्भिश्च यजुर्विद्भिश्च शोभितं मधुरैः सामगीतैश्च ऋषिभिर्नियतव्रतैः ३७ ॥ ॥ ॥ ॥

यज्ञविद्यायां अंगभूतानि कल्पसूत्रादीनि ३७ ॥ ॥ ॥

३८ भारुंडसामानि पूगयज्ञियसामानि च साम्नां अवांतरभेदाः ३९ शब्दसंस्कारः। यथास्थानकरणप्रयत्नैरुच्चारणं स्थानं ताल्वादि करणं जिह्वा
ग्रादि प्रयत्नो घोषादिः ४० यज्ञसंस्तरः इष्टकासुपधानक्रमः न्यायतत्वं युक्तेर्मर्यादा आत्मविज्ञानं स्वानुभवः ४१ नानावाक्यानां एकशाखागतानां स
मिधो यजतीत्यादि प्रयाजाद्यंगविधिपराणां प्रयोगविधिना दर्शपूर्णमासाभ्यां यजेतेत्यादिना एकवाक्यत्वे समाहारः भिन्नशाखास्थानां गुणविधीनामेक
स्यां शाखायामुपसंहारः समवायः तत्र विशारदैः विशेषकार्यं उपासना ब्रह्मलोकफला कर्मभ्यो विशिष्टत्वात् तस्याः मोक्षधर्मा निष्ठ पुगुपदानेन मोक्ष

भारुंडसामगीताभिरथर्वशिरसोत्तमैः यतात्मभिः सुनियतैः मुमुक्षुभिः सततदाश्रमः ३८ अथर्ववेदप्रवराः पूगयज्ञीयसामगाः
संहितामीरयंतिस्म पदक्रमयुतां तु ते ३९ शब्दसंस्कारसंयुक्तैर्ब्रुवन्निश्चापरैर्द्विजैः नादितः स बभौ श्रीमान्ब्रह्मलोक इवा
परः ४० यज्ञसंस्तरविद्भिश्च क्रमशिक्षाविशारदैः न्यायतत्वात्मविज्ञानसंपन्नैर्वेदपारगैः ४१ नानावाक्यसमाहार
समवायविशारदैः विशेषकार्यविद्भिश्च मोक्षधर्मपरायणैः ४२ स्थापनाक्षेपसिद्धांतपरमार्थज्ञतां गतैः शब्दछंदो
निरुक्तज्ञैः कालज्ञानविशारदैः ४३ द्रव्यकर्मगुणज्ञैश्च कार्यकारणवेदिभिः पक्षिवानररुतज्ञैश्च व्यासग्रंथसमाश्रि
तैः ४४ ॥

स्य विशेषकार्यत्वं निरस्तं ४२ स्थापने प्रथमं स्वसिद्धांतस्य स्थापनं तत्राशंका आक्षेपः तस्याः परिहारः सिद्धांतः तैर्यः परमार्थस्तज्ज्ञतां गतैः शब्दो व्याकरण
कालेति ज्योतिषः शिक्षाकल्पावप्येतैरेवोपलक्षणीयौ ४३ द्रव्यं व्रीह्यादि कर्म निर्वापादि गुणोऽष्टाकपालत्वादि कार्यं फलं स्वर्गादिः कारणं यागादिः
पक्षीति द्व्यादीनां प्रकाशकं इषे त्वेत्यादि वाक्यं पक्षिवानररुतमिव अस्फुटार्थं मंत्रादिरूपं तद्विद्भिः तैः व्यासग्रंथः विस्तृतः प्रबंधः इषे त्वेति शाखामा
छिनत्तीति तदीयब्राह्मणादिः तं समाश्रितैः न तु स्वकपोलकल्पितैः प्रकारैर्मंत्रा व्याचक्षते इत्यर्थः ४४ ॥ ॥

लोकेस्वन्आपतंते लोकायतिकाः तेषु लोकारंजनपरेषु मुख्यैः ४५ ५० अथायतनः ४ अनामयं कुशलं राष्ट्रादिह्नेमं ५८ दुष्यासिद्धस्त्वमसि ९

नानाशास्त्रेषु मुख्यैश्च शुश्राव स्वनमीरितं लोकायतिकमुख्यैश्च समंतादनुनादितं ४५ तत्र तत्र च विप्रेंद्रान्नियतान्संशितव्रतान्
जपहोमपरान्विप्रान्ददर्श परवीरहा ४६ आसनानि विचित्राणि रुचिराणि महीपतिः सप्रयत्नोपहितानि स दृष्ट्वा विस्मयमागमत्
४७ देवतायतनानां च प्रेक्ष्य पूजां कृतां द्विजैः ब्रह्मलोकस्थमात्मानं मेने स नृपसत्तमः ४८ स काश्यपतपोगुप्तमाश्रमप्रवरं शु
भं नातृप्यत्प्रेक्षमाणो वै तपोवनगुणैर्युतं ४९ स काश्यपस्यायतनं महाव्रतैर्वृतं समंतादृषिभिस्तपोधनैः विवेश सामात्यपुरोहितो
ऽरिहा विविक्तमत्यर्थमनोहरं शुभं ५० इत्यादिपर्वणि शाकुंतले वैशंपायन उवाच ततो गच्छन्महाबाहुरेकोमात्यान्विसृज्य तान् ना
पश्यच्चाश्रमे तस्मिंस्तमृषिं संशितव्रतं १ सोपश्यमानस्तमृषिं शून्यं दृष्ट्वा तथाश्रमे उवाच क इहेत्युच्चैर्वनं संनादयन्निव २
श्रुत्वाथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ३ सा तं दृष्ट्वैव राजानं दुष्यंतमसितेक्ष
णा स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ४ आसनेनार्चयित्वा च पाद्येनार्घ्येण चैव हि पप्रच्छानामयं राजन्कुशलं च नरा
धिपं ५ यथावदर्चयित्वाथ पृष्ट्वा चानामयं तदा उवाच स्मयमानेव किं कार्यं क्रियतामिति ६ तामब्रवीत्ततो राजा कन्यां मधुरभाषि
णीं दृष्ट्वैवानवद्यांगीं यथावत्प्रतिपूजितः ७ आगतोहं महाभागमृषिं कण्वमुपासितुं क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शो
भने ८ शकुंतला च गतः पिता मे भगवान्फलान्याहर्तुमाश्रमात् मुहूर्तं संप्रतीक्ष्स्व द्रक्ष्यस्येनमुपागतं ९ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आः
१७५

अपश्यमान इति तथा च स्वागतादिप्रकारेण विजने संलापरूपाभ्यां सत्यामेहितरूपाभ्यां १० ११ दर्शनादेवेति शुभे कल्याणावहे एतेन त्वमपत्नपरिग्र
हाधिकारेस्तीति दर्शितं तत्र प्रमाणं स्वचेतसः प्रवृत्तिरेव यथोक्तं अभियुक्तैः असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः सतां हि संदेहपदे

वैशंपायन उवाच अपश्यमानस्तमृषिं तथा चोक्तस्तथा वचः तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीं १० विभ्राजमानां वपुषा तपसा
च दमेन च रूपयौवनसंपन्नामित्युवाच महीपतिः ११ कात्वं कस्यासि सुश्रोणि किमर्थं चागता वने एवंरूपगुणोपेता कुतस्त्वमसि शोभ
ने १२ दर्शनादेव हि शुभे त्वया मेपहृतं मनः इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने १३ एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे उवा
च हसती वाक्यमिदं सुमधुराक्षरं १४ कण्वस्याहं भगवतो दुष्यंत दुहिता मता तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः १५ दुष्यंत उ
वाच ऊर्ध्वरेता महाभागो भगवाँल्लोकपूजितः चलेद्धि वृत्ताद्धर्मोपि न चलेत्संशितव्रतः १६ कथं त्वं तस्य दुहिता संभूता वरवर्णिनी संशयो
मे महानत्र तन्मे छेत्तुमिहार्हसि १७ शकुंतलोवाच यथायमागमो मह्यं यथा चेदमभूत्पुरा शृणु राजन्यथातत्त्वं यथास्मि दुहिता
मुनेः १८ ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिव १९ कण्व उवाच तप्यमानः
किल पुरा विश्वामित्रो महत्तपः सुभृशं तापयामास शक्रं सुरगणेश्वरं तपसा दीप्तवीर्योयं स्थानान्मां च्यावयेदिति भीतः पुरं
दरस्तस्मान्मेनकामिदमब्रवीत् २१ गुणैरप्सरसां दिव्यैर्मेनके त्वं विशिष्यसे श्रेयो मे कुरु कल्याणि यत्त्वां वक्ष्यामि तच्छृणु २२

षु वस्तुषु प्रमाणमंतःकरणप्रवृत्तय इति १३ हसती हसंती १४ १५ १६ आगमः गुरूपदेशः इदमत्र जन्मादिपुराणयथाभूतं तथा शृणु
इत्युत्तरेणान्वयः १८ अभ्यचोदयत् पृष्टवान् १९ २० २१ २२ ॥

रामः
१७५

२४ मेऽस्त्वविघ्नमितिच्छेदः २५ ३० वभार पोषितवान्मतंगः त्रिशंकुः व्याधतां गतः विवाहविघ्नदोषदर्शिनः पितुः कोपादिति शेषः ३१ आश्रमे अभ्येत्य
तपस्तस्थाविति शेषः नद्याः कौशिक्याः ३२ शरणात्त्राणं त्रिशंकोः त्रीणि पितुः कोपः वसिष्ठधेनोर्वधः वृथा गोमांसभक्षणं चेति शंकूनि शंकुतुल्यानि पापानि य

आसावादित्यसंकाशो विश्वामित्रो महातपाः तप्यमानस्तपो घोरं मनकंपयतेनतः २३ मेनके तव भारोऽयं विश्वामित्रः सुमध्यमे
शंसितात्मा सुदुर्धर्ष उग्रे तपसि वर्त्तते २४ स मां न च्यावयेत्स्थानात्तं वै गत्वा प्रलोभय चरतस्तस्य तपो विघ्नं कुरु मेऽविघ्नमुत्तमं २५
रूपयौवनमाधुर्यचेष्टितस्मितभाषितैः लोभयित्वा वरारोहे तपसः संनिवर्त्तय २६ मेनका च महातेजाः स भगवांस्तपेव च
महातपाः कोपनश्च तथा ह्येनं जानाति भगवानपि २७ तेजसस्तपसश्चैव कोपस्य च महात्मनः त्वमप्युद्विजसे यस्मान्नोद्विजेयम
हं कथं २८ महाभागं वसिष्ठं यः पुत्रैरिष्टैर्व्ययोजयत् क्षत्रजातश्च यः पूर्वमभवद्ब्राह्मणो बलात् २९ शौचार्थं यो नदीं
चक्रे दुर्गमां बहुभिर्जलैः यां तां पुण्यतमां लोके कौशिकीति विदुर्जनाः ३० बभार यत्रास्य पुरा काले दुर्गे महात्मनः दारान्म
तंगो धर्मात्मा राजर्षिर्व्याधतां गतः ३१ अतीतकाले दुर्भिक्षे अत्राभ्येत्य पुनराश्रमं मुनिः पारेति नद्या वै नाम चक्रे तदा प्रभुः ३२
मतंगं याजयां चक्रे यत्र प्रीतमनाः स्वयं त्वं च सोमं भयाद्यस्य गतः पातुं सुरेश्वर ३३ चकारान्यं च लोकं वै क्रुद्धो नक्षत्रसंपदा प्र
तिश्रवणपूर्वाणि नक्षत्राणि चकार यः गुरुशापहतस्यापि त्रिशंकोः शरणं ददौ ३४ एतानि यस्य कर्माणि तस्याहं भृशमुद्विजे ॥
यथासौ न दहेत्क्रुद्धस्तथाज्ञापय मां विभो ३५ तेजसा निर्दहेल्लोकान्कंपयेद्धरणीं पदा संक्षिपेच्च महामेरुं तूर्णमावर्त्तयेद्दिशः ३६
पि२

ससः त्रिशंकुस्तस्य यथोक्तं हरिवंशे त्रिशंकुं मति वसिष्ठेन पितुश्च परितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रम इति ३४
तस्य तस्मात् ३५ आवर्त्तयेदेकीकुर्यात् ३६ ॥

३७ सूर्यचंद्रावेवमस्तोः संवर्षिनी नारके यस्य तावपि ध्रुवं गमात्रे पात्र पुंसमर्प्यः ३८ ४० प्रक्रीडिता याः मरुछ्रेक्रीडितं यस्याः विरतो तु अपसारयतु
४१ तस्मिन्कामवायुसाहायके इंद्रेण विहिते संदिष्टे सति ४२ अध्यायः १ एवमुक्तः सदागतिं वायुं १ २ ३ ४ ५ गन्धमासक्तो ६ विहृतां अनाच्छादितां भावं सं

नादर्शनं यस्यास्तु अत्र प्रदीप्तमिव पावकं कथमस्मद्विधा नारी जितेन्द्रियमभिस्पृशेत् ३७ हुताशनमुखं दीप्तं सूर्यचन्द्राक्षितारकं का
लजिह्वं सुरश्रेष्ठ कथमस्मद्विधा स्पृशेत् ३८ यमस्सोमश्च महर्षयः साध्या विश्वेवालखिल्याश्च सर्वे एतेपि यस्योद्विजन्ते प्रभा
वात्तस्मात्कस्मान्न मादृशी नोद्विजेत् ३९ त्वयैवमुक्ता च कथं समीपमृषेर्न गच्छेयमहं सुरेन्द्र रक्षां तु मे चिन्तय देवराज यथा त्वदर्थं
हिताहं चरेयं ४० कामं तु मे मारुतस्तत्र वासः प्रक्रीडिताया विवृणोतु देव भवेच्च मे मन्मथस्तत्र कार्ये सहायभूतस्तव प्रसादात् ४१
वनाच्च वायुः सुरभिः प्रवायात्तस्मिन्काले तमृषिं लोभयन्त्याः तथेत्युक्त्वा विहिते चैव तस्मिंस्ततो ययौ साश्रमं कौशिकस्य ४२ इत्या
दिपर्वणि शाकुन्तले करावड च एवमुक्तस्तया शक्रः संदिदेश सदागतिं प्रातिष्ठत तदा काले मेनका वायुना सह १ अथाप
श्यद्वरारोहा तपसा दग्धकिल्बिषं विश्वामित्रं तप्यमानं मेनका भीरुराश्रमे २ अभिवाद्य ततः सा तं प्राक्रीडदृषिसन्निधौ अपो
वाह च वासोस्या मारुतः शशिसन्निभं ३ सागच्छत्त्वरिता भूमिं वासस्तदभिलिप्सती स्मयमानेव सव्रीडं मारुतं वरवर्णिनी ४ प
श्यतस्तत्र तत्रर्षेरग्निसमतेजसः विश्वामित्रस्ततस्तां तु विषमस्थामनिन्दितां ५ गृद्धां वाससि संभ्रान्तां मेनकां मुनिसत्तमः अ
निर्देश्यवयोरूपामपश्यद्विवृतां तदा ६ तस्या रूपगुणान्दृष्ट्वा स तु विप्रर्षभस्तदा चकार भावं संसर्गात्तया कामवशं गतः ७ न्यमं
त्रयत चाप्येनां सा चाप्यैच्छदनिन्दिता तौ तत्र सुचिरं कालमुभौ व्यहरतां तदा ८ ॥

सर्गात् संदर्शनात् संसोमनः चकार तयोर्हेतुभूतया ७ न्यमंत्रयत प्रह्वीतामकारितवान् विहारं चक्रतुः ८ ॥ छ ॥ छ ॥ छ ॥ छ ॥

९ १२ उपस्प्रष्टुं आह्निके जलकार्यं कर्त्तुं १३ शरीरकृत् निषेका प्राणदाता अन्नप्रदः १४ निर्जने शकुन्तैः परिवारिता उपात्तेति ला आदाने ऽस्माकम्

रममाणो यथाकामं यथैकदिवसं तथा जनयामास स मुनिर्मेनकायां शकुन्तलां प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीं ९ जातमुत्सृज्य तं
गर्भं मेनका मालिनीमनु कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदं १० तं वने विजने गर्भं सिंहव्याघ्रसमाकुले दृष्ट्वा शयानं शकुनाः समन्तात्
पर्यवारयन् ११ नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः पर्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजां १२ उपस्प्रष्टुं गतश्चाहमपश्यं शयिता
मिमां निर्जने विपिने रम्ये शकुन्तैः परिवारितां आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयं १३ शरीरकृत्प्राणदाता यस्य चान्नानि भुंजते
क्रमेणैते त्रयोप्युक्ताः पितरो धर्मशासने १४ निर्जने तु वने यस्माच्छकुन्तैः परिवारिता शकुन्तलेति नामास्याः कृतं चापि ततो मया १५
एवं दुहितरं विद्धि मम विप्र शकुन्तलां शकुन्तला च पितरं मन्यते मामनिन्दिता १६ शकुन्तलोवाच एतदाचष्ट पृष्टः सन्मम जन्म महर्षये
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप १७ कण्वं हि पितरं मन्ये पितरं स्वमजानती इति तेकथितं राजन्मया वृत्तं यथाश्रुते इत्या
दिपर्व शाकुन्तले दुष्यन्त उवाच सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते १ सुवर्णमा
लां वासांसि कुण्डले परिहाटके नानापत्तनजे शुभ्रे मणिरत्ने च शोभने २ आहरामि तवाद्याहं निष्कादीन्यजिनानि च सर्वं राज्यं
तवाद्यास्तु भार्या मे भव शोभने ३ गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि विवाहानां हि रंभोरु गान्धर्वः श्रेष्ठ उच्यते ४ ॥ ॥

स्येयं शकुन्तलेति नामनिर्वचनं १५ १६ शाकुन्तले ऽध्यायः सुव्यक्तमिति गोत्रप्रवर्त्तको पितृयस्मात् ब्राह्मणोपि जातितः क्षत्रिय एव विश्वामित्र इति भावः इत ऊर्ध्वं वा तस्य
ब्राह्मणत्वमिति कल्प्यं १ २ गान्धर्वः वरवध्वोरैकमत्येन कृतः ४

आ॰ ९७

फलाहारः फलान्याहर्तुंगतः ५ ६ नस्त्रीस्वातंत्र्यमर्हतीतिन्यायविरोधमाशंक्याह आत्मनइति ७ पूर्वोक्तंगांधर्वविवाहस्यकर्तव्यतांवक्तुंविवाहभेदानाह अष्टाविति ब्र
ह्मः अलंकृत्यकन्यादानेनतद्देवयज्ञेऋत्विजेदानेदैवः सहोभौधर्मंचरतामितिवुक्त्वादानंप्राजापत्यः वरादेकंमिथुनंशुल्कंगृहीत्वादानेआर्षः बहुधनंगृहीत्वादानेआ

शकुंतला च फलाहारोगतोराजन्पितामेसइत आश्रमात मुहूर्तंसंप्रतीक्षस्वसमांतुभ्यंप्रदास्यति ५ दुष्यंतउ च इच्छामित्वांव
रारोहेभजमानामनिंदिते त्वदर्थंमांस्थितंविद्धित्वद्गतंहिमनोमम ६ आत्मनोबंधुरात्मैवगतिरात्मैवचात्मनः आत्मनैवात्मनोदा
नंकर्तुमर्हसिधर्मतः ७ अष्टावेवसमासेनविवाहाधर्मतःस्मृताः ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः गांधर्वोराक्षसश्चैवपैशाच
श्चाष्टमःस्मृतः ८ तेषांधर्मान्यथापूर्वंमनुःस्वायंभुवोब्रवीत प्रशस्तांश्चतुरःपूर्वान्ब्राह्मणस्योपधारय ९ षडानुपूर्व्याक्षत्रस्य
विद्धिधर्म्याननिंदिते राज्ञांतुराक्षसोप्युक्तोविट्शूद्रेष्वासुरःस्मृतः १० पंचानांतुत्रयोधर्म्याद्वावधर्म्यौस्मृताविह पैशाचश्चासुर
श्चैवनकर्तव्यौकदाचन ११ अनेनविधिनाकार्योधर्मस्यैषागतिःस्मृता गांधर्वराक्षसौक्षत्रेधर्म्यौतौमाविशंकिथाः पृथग्वा
यदिवामिश्रौकर्तव्यौनात्रसंशयः १२ सात्वंममसकामस्यसकामावरवर्णिनी गांधर्वेणविवाहेनभार्याभवितुमर्हसि १३ ॥

सुरः गांधर्वोव्याख्यातः सुप्तानांप्रमत्तानांवापहरेत्सपैशाचोहत्वाभित्वाचशीर्षाणिरुदतींरुदद्भ्योहरेत्सराक्षसइमेतेष्टौक्रमाद्व्याख्याताः ८ १० पंचानांब्राह्मादीनां
त्रयः ब्राह्मदैवप्राजापत्याः धर्म्याः द्वौआर्षासुरौकन्याशुल्कग्रहणादधर्म्यौतयोरप्यासुरः पैशाचवदसंतेहेयइत्याह पैशाचइति ११ परिशेषाद्गांधर्वराक्षसौक्षत्रियस्य
धर्म्याविन्याह गांधर्वेति १२ १३ ॥

शा॰ ९७

१६ १७ उवाससंगंकृतवान् १८ अत्राधिकमयंपाठःकाश्चैवकिराताश्चकुब्जवामनकैः सहसहिताकंचुकिवरैर्वाहिनीसतमागधैरितिश्लोकःपद्यतेतस्यार्थःकुब्जाः
अंतःपुररक्षणायोग्याहितमितभाषिणः किराताः चामरवाहिन्यः स्त्रियः किरातोक्तेछभेदस्यात्भनिवेल्पतनावपिस्त्रियांचामरवाहिन्यांकुट्टनीदुर्गमारपीतिमेदिनीकु

शकुंतलोवाच यदिधर्मपथस्त्वेषयदिचात्माप्रभुर्मम प्रदानेपौरवश्रेष्ठशृणुमेसमयंप्रभो १४ सत्यंमेप्रतिजानीहियथाव
क्ष्याम्यहंरहः मयिजायेतुयःपुत्रःसभवेत्वदनंतरः १५ युवराजोमहाराजसत्यमेतद्ब्रवीमिते यद्येतदेवंदुष्यंतअस्तुमेसंगमस्त्व
या १६ वैशंपायनउवाच एवमस्त्वितितांराजाप्रत्युवाचाविचारयन् अपिचत्वांहिनेष्यामिनगरंस्वंशुचिस्मिते यथात्वमर्हा
सुश्रोणिसत्यमेतद्ब्रवीमिते १७ एवमुक्त्वासराजर्षिस्तामनिंदितगामिनी जग्राहविधिवत्पाणावुवासचतयासह १८ विश्वास्य
चैनांसप्रायादब्रवीच्चपुनःपुनः प्रेषयिष्येतवार्थायवाहिनीचतुरंगिणीं १९ तयात्वानाययिष्यामिनिवासंस्वंशुचिस्मिते २०
वैशंपायनउवाच इतितस्याःप्रतिश्रुत्यसनृपोजनमेजय मनसाचिंतयन्प्रायात्काश्यपंप्रतिपार्थिवः २१ भगवांस्तपसायुक्तः
श्रुत्वाकिंनुकरिष्यति एवंसंचिंतयन्नेवप्रविवेशस्वकंपुरं २२ मुहूर्तयातेतस्मिंस्तुकण्वोप्याश्रममागमत् शकुंतलाचपितरं
ह्रियानोपजगामतं २३ विज्ञायाथचतांकण्वोदिव्यज्ञानोमहातपाः उवाचभगवान्प्रीतःपश्यन्दिव्येनचक्षुषा २४ त्वयाद्य
भद्रेरहसिमामनादृत्ययःकृतः पुंसासहसमायोगोनसधर्मोपघातकः २५ ७ ॥ ॥ ॥ ॥ ॥

ब्जावामनकाः वदनपुष्पोदकादिकराः श्चैवच्चेटाश्चकंचुकिनः अंतःपुराध्यक्षाः कंचुकान्तःपुराध्यक्षोइतिमेदिनी। वाहिनीप्रेष्यतइतिशेषः १९ तयावाहि
न्या २० २५ ॥

श्रा॰
१५८

१८ परं शत्रुं च चक्रं सैन्यं चक्रः कोके तुमान् ज्योतिर्विद्वज्जैसैन्यरथांगयोः इदमेव चक्रवर्तिशब्दप्रवृत्तिनिमित्तं १९ ३३ अध्यायः प्रतिसमाप्तेति ९८ ॥

क्षत्रियस्य हि गांधर्वो विवाहः श्रेष्ठ उच्यते सकामायाः सकामेन निर्मंत्रो रहसि स्मृतः २६ धर्मात्मा च महात्मा च दुष्यंतः पुरुषोत्त
मः अभ्यगच्छः पतिं यं त्वं भजमाने शकुंतले २७ महात्मा जनिता लोके पुत्रस्तव महाबलः य इमां सागरापांगीं कृत्स्नां भोक्ष्यति
मेदिनीं २८ परं चाभिप्रयातस्य चक्रं तस्य महात्मनः भविष्यत्यप्रतिहतं सततं चक्रवर्तिनः २९ ततः प्रक्षाल्य पादौ सा विश्रां
तं मुनिमब्रवीत् विनिधाय ततो भारं संनिधाय फलानि च ३० शकुंतला च मया पतिर्वृतो राजा दुष्यंतः पुरुषोत्तमः तस्मै ससचि
वाय त्वं प्रसादं कर्तुमर्हसि ३१ कण्व उवाच प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनी गृहाण च वरं मत्तस्तत्र यदभीप्सितं ३२
वैशंपायन उ च ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा शकुंतला पौरवाणां दुष्यंतहितकाम्यया ३३ इत्यादिपर्वणि शाकुंत
ले वैशंपायन उ च प्रतिज्ञाय तु दुष्यंते प्रतियाते शकुंतला गर्भं सुषाव वामोरूः कुमारममितौजसं १ त्रिषु वर्षेषु पूर्णेषु दीप्तान
लसमद्युतिं रूपौदार्यगुणोपेतं दौष्यंतिं जनमेजय २ जातकर्मादिसंस्कारं कण्वः पुण्यकृतां वरः विधिवत्कारयामास वर्धमान
स्य धीमतः ३ दंतैः शुक्लैः शिखरिभिः सिंहसंहननो महान् चक्रांकितकरः श्रीमान्महामूर्धा महाबलः ४ कुमारो देवगर्भाभः स त
त्राशु समवर्धत षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति ५ सिंहव्याघ्रान्वराहांश्च महिषांश्च गजांस्तथा बद्ध्वा वृक्षेषु बलवानाश्रमस्य समीपतः
६ आरोहन्दमयंश्चैव क्रीडंश्च परिधावति ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ७ अस्त्वयं सर्वदमनः सर्वं हि दमयत्यसौ स सर्वदमनो नाम
कुमारः समपद्यत ८ ॥

राम॰
१५८

विक्रमः पराभिभवसामर्थ्यं। ओजः कांतिः बलं शारीरं ९ ११ नरोचते। न शोभते चारित्रं शीलं धर्मः पातिव्रत्यं १२ १९ धर्मार्थकामसंबंधं धर्मे चार्थे च कामे च वना

विक्रमेणौजसा चैव बलेन च समन्वितः ९ तं कुमारं महर्षिर्दृष्ट्वा कर्म चास्यातिमानुषं समयो यौवराज्यायेत्यब्रवीच्च शकुंतलां तस्मात्तद्बलमाज्ञाय क
ण्वः शिष्यानुवाच ह १० शकुंतलामिमां शीघ्रं सहपुत्रामितो गृहात् भर्तुः प्रापयतागारं सर्वलक्षणपूजिते ११ नारीणां चिरवासो हि बांधवेषु न रोचते
कीर्तिचारित्रधर्मघ्नस्तस्मान्नयत माचिरं १२ तथेत्युक्त्वा तु ते सर्वे प्रातिष्ठंत महौजसः शकुंतलां पुरस्कृत्य सपुत्रां गजसाह्वयं १३ गृहीत्वामरगर्भाभं
पुत्रं कमललोचनं आजगाम ततः सुभ्रूर्दुःषंतविदिताद्वनात् १४ अभिसृत्य च राजानं विदिता च प्रवेशिता सह तेनैव पुत्रेण बालार्कसमतेजसा १५
निवेदयित्वा ते सर्वे आश्रमं पुनरागताः पूजयित्वा यथान्यायमब्रवीच्च शकुंतला १६ अभिसृत्य च राजानं विदिता च प्रवेशिता अयं पुत्रस्त्वया राज
न्यौवराज्येऽभिषिच्यतां त्वया ह्ययं सुतो राजन्मय्युत्पन्नः सुरोपमः यथासमयमेतस्मिन्वर्त्तस्व पुरुषोत्तम १७ यथा समागमे पूर्वं यः कृतः समयस्त
तं यातिस्मरस्व महाभाग कण्वाश्रमपदं प्रति १८ सोऽथ श्रुत्वैव तद्वाक्यं तस्या राजा स्मरन्नपि अब्रवीन्न स्मरामीति कस्य त्वं दुष्टतापसि १९ ध
र्मकामार्थसंबंधं न स्मरामि त्वया सह गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु २० सैवमुक्त्वा वरारोहा व्रीडितेव तपस्विनी निःसंज्ञेव च दुः
खेन तस्थौ स्थाणुरिवानिश्चला २१ संरंभामर्षताम्राक्षी स्फुरमाणोष्ठसंपुटा कटाक्षैर्निर्दहंतीव तिर्यग्राजानमैक्षत २२ आकारं गूह
मानाच मन्युना च समीरिता तपसा संभृतं तेजो धारयामास वै तदा २३ ॥

तिचरणमीति विवाहमंत्रप्रकाशितं वैवाहिकं संबंधं ॥ २० २१ २२ २३ ॥ ॥ ॥ ॥ ॥ ॥

आ०ः
१५९

२५ साक्ष्येणसाक्षिधर्मेणाऽथोदासीनबोधरूपेण २६ २७ दुष्षंतंअंतर्यामिणंमुनिंनारायणं २८ २९ ३० निर्यातपरिहरतिदुष्कृतेपापे ३१ विपात

सामुहूर्त्तमिवध्यात्वादुःखामर्षसमन्विता भर्त्तारमभिसंप्रेक्ष्यक्रुद्धावचनमब्रवीत् २४ जानन्नपिमहाराजकस्मादेवंप्रभाषसे नजाना
मीतिनिःशंकंयथान्यःप्राकृतोजनः २५ अत्रतेहृदयंवेदसत्यस्यैवानृतस्यचकल्याणंवदसाक्ष्येणमात्मानमवमन्यथाः २६ योन्यथासंत
यात्मानमन्यथाप्रतिपद्यते किंतेननकृतंपापंचौरेणात्मापहारिणा २७ एकोहमस्मीतिचमन्यसेत्वंनहृच्छयंवेत्सिमुनिंपुराणं योवेदिताक
र्मणःपापकस्यतस्यांतिकेत्वंवृजिनंकरोषि २८ मन्यतेपापकंकृत्वानकश्चिद्वेत्तिमामिति विदंतिचैनंदेवाश्चयश्चैवांतरपूरुषः २९ आदित्यचं
द्रावनिलानलौचद्यौर्भूमिरापोहृदयंयमश्च अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तं ३० यमोवैवस्वतस्तस्यनिर्यातयतिदुष्कृतं ३१
३२ योवमन्यात्मनात्मानमन्यथाप्रतिपद्यते नतस्यदेवाःश्रेयांसोयस्यात्मापिनकारणं ३३ स्वयंप्राप्तेतिमामेवंमावमंस्थाःपतिव्र
तां अर्घ्यार्हांनार्चयसिमांस्वयंभार्यामुपस्थितां ३४ किमर्थंमांप्राकृतवदुपप्रेक्षसिसंसदि नखल्वहमिदंशून्येरौमिकिंनशृणोषि
मे ३५ यदिमेयाचमानायावचनंनकरिष्यसि दुःषंतशतधामूर्धाततेद्यस्फुटिष्यति ३६ भार्यांपतिःसंप्रविश्यसयस्माज्जायतेपु
नः जायायास्तद्धिजायात्वंपौराणाःकवयोविदुः ३७ यदागमवतःपुंसस्तदपत्यंप्रजायते तत्तारयतिसंतत्यापूर्वप्रेतान्पितामहान् ३८

यतिविशेषेणयातनांपीडांकरोतिदुष्टंकृतमस्यनेदुष्कृतं ३२ नकारणंश्रेयसेहेतुर्यः ३३ ३६ पौराणाःकवयोवैदिकाःतज्जायायाभवतियदस्यांजाय
तेपुनरिम्यादिमंत्रविदः ३७ आगमवतोवेदोक्तसंस्कारादिकर्मविदोयत्तदमितप्रभावमपत्यंजायतेतत्तारयतिति ३८

रामः
१५९

३९ पुन्नाम्नरकान्नः परं पौत्रेण लोकाञ्जयते पौत्रेणानंत्यमश्नुते अथ पौत्रस्य पुत्रेणाप्नोतीत्येतेप्रतितानामहारीतपठं जितत्रपुत्रेणानरकादुद्धृतः पौत्रेण स्वर्गं नीयते प्रपौत्रेण
ततोप्युपरिनीयते पुत्रेणैव ब्रह्मलोके प्रापितश्चानंतं मोक्षं लभते नासाम्प्रपौत्रमेषच्छन्तेनस्मर्थः ४० ४२ पितरः पितृवत्‌ हितैषिणः मातरः मातृवत्‌ दुःखहे

पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ३९ सा भार्या या गृहे दक्षा सा भार्या या प्रजावती सा भार्या
या पतिप्राणा सा भार्या या पतिव्रता ४० अर्द्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः ४१ भार्यावंतः
क्रियावंतः सभार्या गृहमेधिनः भार्यावंतः प्रमोदंते भार्यावंतः श्रियान्विताः ४२ सखायः प्रविविक्तेषु भवंत्येताः प्रियंवदाः पितरो धर्मकार्येषु
भवंत्यार्तस्य मातरः ४३ कांतारेष्वपि विश्रामो जनस्याध्वनिकस्य वै यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ४४ संसरंतमपि प्रेतं विषमे
ष्वेकपातिनं भार्यैवान्वेति भर्तारं सततं या पतिव्रता ४५ प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति
४६ एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते यदाप्नोति पतिर्भार्यामिह लोके परत्र च ४७ आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः त
स्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरं ४८ भार्यायां जनितं पुत्रमादर्शेष्विव चाननं ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत ४९
दह्यमाना मनोदुःखैर्व्याधिभिश्चातुरा नराः ह्लादंते स्वेषु दारेषु घर्मार्त्ताः सलिलेष्विव ५०

त्रः ४३ ४४ विषमेषु नरकेषु एक एव पततीति तं एकपातिनं अन्वेति अनुगमनं करोति भर्तारं नरकादुद्धर्तुं मित्योक्तं व्यालग्राही यथा व्यालं बलादुद्धरते वि
लात्तानरकस्थं पतिं न दहति प्राणानुगासनीति ४५ ४७ मातृवत्तज्जन्मभूमिवत्‌ ४८ दह्यमाना अपि चातुराः स्वेषु दारेषु ह्लादंते ४९ ५० ॥

सुसंरब्धोपि अतिक्रुद्धोपि रममाणां रम्यस्त्रीणां ५१ ५२ प्रतिपद्यप्रेम्णा ५३ ५५ शिशोरजातदंतस्य सूनोः ५६ ६२ मंत्रग्रामेष्वेव पठति। अंगादिति शरदः

सुसंरब्धोपि रमाणां न कुर्यादप्रियं नरः रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य हि ५१ आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनं ऋषी
णामपि का शक्तिः स्रष्टुं रामामृते प्रजां ५२ प्रतिपद्य पदात्तनुर्धरणीरेणुगुंठितः पितुराश्लिष्यतेंगानि किमस्त्यभ्यधिकं ततः ५३
सत्वं स्वयमभिप्राप्तं साभिलाषमिमं सुतं प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ५४ अंडानि बिभ्रति स्वानि न भिंदंति पिपीलि
काः न भरेथाः कथं न त्वं धर्मज्ञः सन्स्वमात्मजं ५५ न वाससां न रामाणां नापां स्पर्शस्तथाविधः शिशोरालिंग्यमानस्य स्पर्शः सूनोर्य
था सुखः ५६ ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठा चतुष्पदां गुरुर्गरीयसां श्रेष्ठः पुत्रः स्पर्शवतां वरः ५७ स्पृशतु त्वां समाश्लिष्य
पुत्रोयं प्रियदर्शनः पुत्रस्पर्शात्सुखतरः स्पर्शो लोके न विद्यते ५८ त्रिषु वर्षेषु पूर्णेषु प्रजाताहमरिंदम इमं कुमारं राजेंद्र त
व शोकविनाशनं ५९ आहर्ता वाजिमेधस्य शतसंख्यस्य पौरव इति वागंतरिक्षे मां सूतकेऽभ्यवदत्पुरा ६० ननु नामांकमारोप्य स्ने
हाद्ग्रामांतरं गताः मूर्ध्नि पुत्रानुपाघ्राय प्रतिनंदंति मानवाः ६१ वेदेष्वपि वदंतीमं मंत्रग्रामं द्विजातयः जातकर्मणि पुत्राणां त
वापि विदितं तथा ६२ अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतं ६३ जीवितं त्वदधीनं
मे संतानमपि चाक्षयं तस्मात्त्वं जीव मे पुत्र सुसुखी शरदां शतं ६४ त्वदंगेभ्यः प्रसूतोयं पुरुषात्पुरुषोऽपरः सरसीवामले त्वात्मानं द्वि
तीयं पश्य वै सुतं ६५

वर्षाणि ६३ ६४ त्वात्ते आत्मानं द्वितीयं संप्रति बिंबरूपं त्वत्तनवसा दृश्यमत्र पश्येति ६५ ॥ ॥ ॥

एकः सन्पुत्रे जाते योगीव द्विधाकृतः द्वैरूप्यं गतः ६८ ६९ साप्रसिद्धा अजीजनन्मामिति शेषः। अवकीर्य अधमत्यक्त्वा असती अपत्यस्नेहहीना ७० ७४

यथाह्याहवनीयोग्निर्गार्हपत्यात्प्रणीयते तथात्वत्तः प्रसूतोयंत्वमेकः सन्द्विधाकृतः ६६ मृगावकृष्टेन पुरा मृगयां परिधावता अह
मासादितास्त्वराजन्कुमारी पितुराश्रमे ६७ उर्वशी पूर्वचित्तिश्च सहजन्या च मेनका विश्वाची घृताची च षडेवाप्सरसां वराः ६८ तासां मे
मेनका नाम ब्रह्मयोनिर्वराप्सराः दिवः संप्राप्य जगतीं विश्वामित्रादजीजनत् ६९ सा मां हिमवतः प्रस्थे प्रसुषुवे मेनकाप्सराः अवकी
र्य च मां याता परात्मजमिवासती ७० किंनु कर्माशुभं पूर्वं कृतवत्यस्मि जन्मनि यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति च त्वया ७१ कामं त्वया परि
त्यक्ता गमिष्याम्यहमाश्रमे इमं तु बालं संत्यक्तुं नार्हस्यात्मजमात्मनः ७२ दुष्यन्त उवाच न पुत्रमभिजानामि त्वयि जातं शकुन्तले असत्
यवचना नार्यः कस्ते श्रद्धास्यते वचः ७३ मेनका निरनुक्रोशा बन्धकी जननी तव यया हिमवतः पृष्ठे निर्माल्यमिव चोज्झिता ७४
स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव विश्वामित्रो ब्राह्मणत्वे लुब्धः कामवशंगतः ७५ मेनकाप्सरसां श्रेष्ठा महर्षीणां पि
ता च ते तयोरपत्यं कस्मात्त्वं पुंश्चलीव प्रभाषसे ७६ अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे विशेषतो मत्सकाशे दुष्टतापसि गम्य
तां ७७ क्व महर्षिः स चैवोग्रः साप्सराः क्व च मेनका क्व च त्वमेवं कृपणा तापसीवेषधारिणी ७८ अतिकायश्च ते पुत्रो बालो
ऽपि बलवानयं कथमल्पेन कालेन शालस्तम्भ इवोद्गतः ७९ सुनिकृष्टा च ते योनिः पुंश्चलीव प्रभाषसे यदृच्छया कामरागाज्जाता
मेनकया ह्यसि ८१

तव पितरौ नीचोच्चौ वा कथं त्वमेवं भाषसे अस्माद्द्वाभ्यां सवेति ७५ ७६ ७७ ७८ ७९ ८० ८१ ॥ ॥ ॥ ॥ ॥ ॥

श्रा: २५१

परोक्षं अविश्वसनीयं ८१ ८८ विहेठकः निंदकः परोपतापको वा इहहवाधायां ८९ ९२ निर्लज्जः सुखी ९३ यत्र विषये परैः सन्निः वाच्याः निंद्याः संतो दुरात्मानः

सर्वमेतत्परोक्षं मे यत्त्वं वदसि तापसि नाहं त्वामभिजानामि यथेष्टं गम्यतां त्वया ८१ शकुंतलो च राजन्सर्षपमात्राणि परच्छिद्राणि
पश्यसि आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि ८२ मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकां ममैवोद्रिच्यते जन्म दुष्यंत तव जन्मतः ८३ क्षितावटसि राजेंद्र अंतरिक्षे चराम्यहं आवयोरंतरं पश्य मेरुसर्षपयोरिव ८४ महेंद्रस्य कुबेरस्य यमस्य वरुणस्य च
भवनान्यनुसंयामि प्रभावं पश्य मे नृप ८५ सत्यश्चापि प्रवादोयं यं प्रवक्ष्यामि तेनघ निदर्शनार्थं न द्वेषात्तच्छ्रुत्वा तं क्षंतुमर्हसि ८६
विरूपो यावदादर्शे नात्मनः पश्यते मुखं मन्यते तावदात्मानमन्येभ्यो रूपवत्तरं ८७ यदा स्वमुखमादर्शे विकृतं सोभिवीक्षते तदे
तरं विजानीते आत्मानं चेतरं जनं ८८ अतीवरूपसंपन्नो न किंचिदवमन्यते अतीवजल्पन्दुर्वाचो भवतीह विहेठकः ८९ मूर्खो हि
जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ९० प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवांभसः ९१ अन्यान्परिवदन्साधुर्यथा हि परितप्यते तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः
९२ अभिवाद्य यथा वृद्धान्संतो गच्छंति निर्वृतिं एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ९३ सुखं जीवंत्यदोषज्ञा मूर्खा दोषा
नुदर्शिनः यत्र वाच्याः परैः संतः परानाहुस्तथाविधान् ९४ अतो हास्यतरं लोके किंचिदन्यन्न विद्यते यत्र दुर्जनमित्याह दु
र्जनः सज्जनं स्वयं ९५ ॥

परान्साधूंस्तथाविधा[illegible]नाहुः ९४ ९५ श्रीरामो जयति ॥ ॥ ❀ ॥ ॥ ❀ ॥ ॥ ❀ राम: २५१

अनास्तिकः आस्तिकान्नित्नः ९६ इहाग्निमेयं घ्नंति लोकानमुत्र ९७ ९८ स्वपत्नीप्रभवान् अन्यासु चोत्पन्नान् चतुर्विधानेवं पंचापुत्रान्मनुराह जातान् कृता
नउपनयनादिना संस्कृतान् ९९ १०० आत्मानं पालयन् पालनहेतोः १५ समयः नियमः संगतं सख्यं ६० अत्र कृतेपि गर्दभी क्षीरात्मयः पास्यति इत्यह

सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव अनास्तिकोप्युद्विजते जनः किं पुनरास्तिकः ९६ स्वयमुत्पाद्य वै पुत्रं सदृशं यो न मन्यते तस्य देवा
श्रियं घ्नंति न च लोकानुपाश्नुते ९७ कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन् उत्तमं सर्वधर्माणां तस्मात्पुत्रं न संत्यजेत ९८ स्वपत्नीप्रभवा
न्पंच लब्धान्क्रीतान्विवर्द्धितान् कृतानन्यासु चोत्पन्नान्पुत्रान्वै मनुरब्रवीत् ९९ धर्मकीर्त्त्यावहा नॄणां मनसः प्रीतिवर्द्धनाः त्रायंते नरका
ज्जाताः पुत्रा धर्मप्लवाः पितॄन् १०० स त्वं नृपतिशार्दूल पुत्रं न त्यक्तुमर्हसि आत्मानं सत्यधर्मौ च पालयन्पृथिवीपते नरेंद्र सिंहकपटं
न वोढुं त्वमिहार्हसि १०१ वरं कूपशताद्वापी वरं वापीशतात्क्रतुः वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरं २ अश्वमेधसहस्रं च सत्यं च
तुलया धृतं अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ३ सर्ववेदाधिगमनं सर्वतीर्थावगाहनं सत्यं च वचनं राजन्समं वा स्यान्न वा
समं ४ नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परं न हि तीव्रतरं किंचिदनृतादिह विद्यते ५ राजन्सत्यं परं ब्रह्म सत्यं च समयः परः मा त्या
क्षीः समयं राजन्सत्यं संगतमस्तु ते ६ अनृते चेत्प्रसंगस्ते श्रद्दधासि न चेत्स्वयं आत्मनाहं तु गच्छामि त्वादृशे नास्ति संगतं ७ त्वामृते
विहि दुष्यंत शैलराजावतंसकां चतुरंतामिमामुर्वीं पुत्रो मे पालयिष्यति ८ वैशंपायन उवाच एतावदुक्त्वा राजानं प्रातिष्ठत शकुंत
ला

नर इति क्व विस्मयेनात स्यायंभावः गर्दभी क्षीरवत्स्वयापात्त्वमपि पारम्पर्यं परित्यज्य आघभुजतले नैवमस्त्वेत्राराज्यं करिष्यतीति । त्वमिति चतुरंतां चतुःसमुद्रांतां ८

आ:
१५२

भस्त्रा चर्मकोशः तत्र निहितं बीजं यथा तदीयं न भवति एवं माता तापि भस्त्रेव येन हेतुना यो जातः स एव सः कार्यस्य कारणानन्यत्वात् भरस्व धारयस्व पोषय
स्वधा १० रेतः सेक्ता यः स एव पुत्रः पितुरन्य एवेत्यर्थः उन्नयति ऊर्ध्वं नयति यमक्षयात् नरकात् पितॄन् इति शेषः १२ अभूतिः अभाग्यं १३ १६ गृह्णीयामिति ग्र

अथांतरिक्षाद्दुःषंतं वागुवाचाशरीरिणी ऋत्विक्पुरोहिताचार्यैर्मंत्रिभिश्चावृतं तदा ९ भस्त्रा माता पितुः पुत्रो येन जातः स एव सः भरस्व
पुत्रं दुःष्यंत मावमंस्थाः शकुंतलां १० रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला ११ जाया जनयते
पुत्रमात्मनोंगं द्विधाकृतं तस्माद्भरस्व दुःष्यंत पुत्रं शाकुंतलं नृपः १२ अभूतिरेषा यस्त्यक्त्वा जीवन्जीवंतमात्मजं शाकुंतलं महात्मानं
दौष्यंतिं भर पौरवं १३ भर्तव्योयं त्वया यस्मादस्माकं वचनादपि तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः १४ तच्छ्रुत्वा पौरवो राजा
व्याहृतं त्रिदिवौकसां पुरोहितममात्यांश्च संप्रहृष्टोब्रवीदिदं १५ शृण्वंत्वेतद्भवंतोस्य देवदूतस्य भाषितं अहं चाप्येवमेवैनं जानामि
स्वयमात्मजं १६ यद्यहं वचनादेव गृह्णीयामिममात्मजं भवेद्धि शंक्यो लोकस्य नैव शुद्धो भवेदयं १७ वैशंपायन उवाच तं विशो
ध्य तदा राजा देवदूतेन भारत हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतं १८ ततस्तस्य तदा राजा पितृकर्माणि सर्वशः कारयामास मुदि
तः प्रीतिमानात्मजस्य ह १९ मूर्ध्नि चैनमुपाघ्राय सस्नेहं परिषस्वजे सभाज्यमानो विप्रैश्च स्तूयमानश्च बंदिभिः समुदं परमां लेभे
पुत्रसंस्पर्शजां नृपः २० तां चैव भार्यां दुःष्यंतः पूजयामास धर्मतः अब्रवीच्चैव तां राजा सांत्वपूर्वमिदं वचः २१ कृतो लोकपरोक्षोयं
संबंधोयं त्वया सह ॥ ॥

ह्णीयां इत्य लोपाभाव आर्षः १७ १८ पितृकर्माणि पित्रा कर्तव्यान्युपनयनादीनि १९ सभाज्यमानः पूज्यमानः २० २१ ॥ ॥ ॥ ॥

राम:
१५२

चक्रं रथचक्रं आज्ञा वा अव्याहतेनास्य सर्वं व्याप्नोतीति चक्रवर्ती सार्वभौमः सर्वभूमीश्वरः २९ पद्मानां कोटिशतानां ३० ३१ सत्यं व्रतं आर्जवं

तै २

तस्मादेतन्मया देवि त्वच्छुद्ध्यर्थं विचारितं २२ मन्यते चैव लोकस्ते स्त्रीभावान्मयि संगतं पुत्रश्चायं वृतो राज्ये मया तस्मादिदं विचा-
रितं २३ यच्च कोपितयात्यर्थं त्वयोक्तोऽस्म्यप्रियं प्रिये प्रणयिन्या विशालाक्षि तत्क्षांतं मे मया शुभे २४ तामेवमुक्त्वा राजर्षिर्दुष्यंतो
महिषीं प्रियां वासोभिरन्नपानैश्च पूजयामास भारत २५ दुष्यंतस्तु तदा राजा पुत्रं शाकुंतलं तदा भरतं नामतः कृत्वा यौवराज्ये-
ऽभ्यषेचयत् २६ तस्य तत्प्रथितं चक्रं प्रावर्तत महात्मनः भास्वरं दिव्यमजितं लोकसन्नादनं महत् २७ स विजित्य महीपालां-
५१ श्चकार वशवर्तिनः चचार च सतां धर्मं प्राप चानुत्तमं यशः २८ स राजा चक्रवर्त्यासीत्सार्वभौमः प्रतापवान् ईजे च बहुभि-
र्यज्ञैर्यथा शक्रो मरुत्पतिः २९ याजयामास तं कण्वो विधिवद्भूरिदक्षिणं श्रीमान्गोविततं नाम वाजिमेधमवाप सः यस्मिन्स- ५८
हस्रं पद्मानां कण्वाय भरतो ददौ ३० भरताद्भारती कीर्तिर्येनेदं भारतं कुलं अपरे ये च पूर्वे वै भारता इति विश्रुताः
३१ भरतस्यान्वये हि देवकल्पा महौजसः बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः ३२ येषामपरिमेयानि नामधे-
यानि सर्वशः तेषां तु ते यथामुख्यं कीर्तयिष्यामि भारत महाभागान्देवकल्पान्सत्यार्जवपरायणान् ३३ इत्यादिपर्वणि शा-
कुंतले समाप्तिः ॥

नि १

धर्मः तेन एव परां अयनं प्राप्यं येषां तान् ३३ इति म र का मा म दा धु ध व ई वं व ससम श्रीगोविंदसूनोः श्रीनीलकंठस्य कृतौ म-
हाभारतभावदीपे आदिपर्वणि शाकुंतलेऽर्थप्रकाशः

श्री·
१५३

वंशस्य भारतत्वे निमित्तमुक्त्वा तमेव वाह प्रजापतेरित्यादिना १३ प्राचेतसः आ वेदेशाय प्रसाक्षिप पाश्चर्तं तिसततं गच्छतीति प्राचेताः चतुर्थ्यर्थे अलुक् अत
सात तपगमनेन स्मात्समेरतमानाः इत्यादौ यत्तसातत्यार्थत्वेन इच्छार्द्रसुततस्य प्राचेतसः प्राचीनवर्हिषः महाग्रंथे अन्नसंत्यागमस्येति प्राचेतसः नीचानेष त्व
न सत्वसुखं हत्वा दोत्तरोपतत सशब्दो हृद्या अविस्पष्टाविधेयांशत्वदोषमाश्रित्य प्रचेतसानमयं पिता प्राचेतस इति वा आस्मिन्पक्षे दक्षस्य पांसलुगिति षष्ठ्याः
सुः अन्ये तु प्रचेतसः इति पाठे प्रकल्प्य प्राचीनवर्हिषः इत्यध्याहरंति तातपुरापजनाः पुरोपात्सादकास्तपः शीलाः इत्यर्थः येसैम होजसो महाप्रभावाः दक्षौषधये

वैशंपायन उवाच प्रजापतेस्तु दक्षस्य मनोर्वैवस्वतस्य च भरतस्य कुरोः पूरोरजमीढस्य चानघ १ यादवानामिमं वंशं कौरवा
णां च सर्वशः तथैव भरतानां च पुण्यं स्वस्त्ययनं महत् २ धन्यं यशस्यमायुष्यं कीर्तयिष्यामि तेनघ तेजोभिरुदिताः सर्वे महर्षिसम
तेजसः ३ दश प्राचेतसः पुत्राः संतः पूर्वजनाः स्मृताः सुव्रते नाग्निना ये वै पूर्वं दग्धा महौजसः ४ तेभ्यः प्राचेतसो जज्ञे दक्षो
दक्षादिमाः प्रजाः संभूताः पुरुषव्याघ्र स हि लोकपितामहः ५ वीरिण्या सह संगम्य दक्षः प्राचेतसो मुनिः आत्मतुल्यानज
नयत्सहस्रं संशितव्रतान् ६ सहस्रसंख्यान्संभूतान्दक्षपुत्रांश्च नारदः मोक्षमध्यापयामास सांख्यज्ञानमनुत्तमम् ७ ॥

दग्धाः येन पूर्वमिति पाठे तु ये पूर्वं पुरापजनाः एव हसाः सन्तालेमीमहौजसो वृक्षाः भूमिमाछन्नमाराणां पीडाकराः दग्धाः यैरिति शेषः ४५ वी
रिणा वीरणापुत्र्या ७६ मोक्षं मोक्षहेतुं सांख्यज्ञानं विवेकज्ञं विज्ञानं एतेन ज्ञाततत्त्वाः प्रजा न कामयंते इति दर्शितं तथा च श्रुतिः किं प्रजया क
रिष्यामो येषां नोयमात्मायं लोक इति ७

राम:
१५३

ततइतिस्त्रियः प्रायेणाज्ञानान्हीइतिभावः तथाचश्रुतिः स्त्रियाअशास्यंमनइति अभिसंदधेपुत्रिकाएवदौहित्रद्वाराममपुत्राइतिमनसेसंकल्पित

ततःपंचाशतंकन्याःपुत्रिकाअभिसंदधे प्रजापतिःप्रजाःस्त्रष्टुंसिसृक्षुर्जनमेजय ८ ददौदशसधर्मायकश्यपायत्रयोदश का
लस्यनयनेयुक्ताःसप्तविंशतिमिंदवे ९ त्रयोदशानांपत्नीनांयातुदाक्षायणीवरा मारीचःकश्यपस्तस्यामादित्यान्समजी
जनत् १० इंद्रादीन्वीर्यसंपन्नान्विवस्वंतमथापिच विवस्वतःसुतोजज्ञेयमोवैवस्वतःप्रभुः ११ मार्तंडस्यमनुर्धीमानजायतसु
तःप्रभुः यमश्चापिसुतोयज्ञेख्यातस्तस्यानुजःप्रभुः १२ धर्मात्मासमनुर्धीमान्यत्रवंशःप्रतिष्ठितः मनोर्वंशोमानवानांततोयंप्र
थितोभवत् १३ ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तुमानवाः ततोभवन्महाराजब्रह्मक्षत्रेणसंगतं १४ ब्राह्मणामानवास्ते
षांसांगंवेदमधारयन् वेनंधृष्णुंनरिष्यंतंनाभागेक्ष्वाकुमेवच १५ कारूषमथशर्यातिंतथाचैवाष्टमीमिलां पृषध्रंनवमंप्रा
हुः क्षत्रधर्मपरायणं १६ नाभागारिष्टदशमान्मनोःपुत्रान्प्रचक्षते पंचाशत्तुमनोःपुत्रास्तथैवान्येभवन्क्षितौ १७ अ
न्योन्यभेदात्तेसर्वेविनेशुरितिनःश्रुतं पुरूरवास्ततोविद्वानिलायांसमपद्यत सावैतस्याभवन्मातापिताचैवेतिनःश्रुतं
१८ त्रयोदशसमुद्रस्यद्वीपानश्नन्पुरूरवाः अमानुषैर्वृतःसत्वैर्मानुषःसन्महायशाः १९ ॥ ॥ ॥ ॥

वाच्या ८ ११ मार्तंडस्यविवस्वतःयमश्चेतिपुनरुक्तिर्मनुतःकनिष्ठत्वप्रख्यापनार्था १२ १६ चतुर्थीन्नाभागादन्योयंनाभागारिष्टोदशमः १७
अन्योन्यभेदात्परस्परवैरात् १८ मातेवलब्धपुंभावाराज्यदानात्पिताप्यभूत्तमनुख्याः पिताबुधएव १९

त्रयोदश द्वीपाः अवांतरभेदास्तेच स्वर्णप्रस्थश्चंद्रशुक्ल आवर्त्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंका रोमकप्रसन्नेसिद्धपुरं यमकोटि
रित्येकादश जंबूद्वीप सोपद्वीपाः द्वादशो जंबूद्वीपः प्लक्षादिषट्कां चेत्यष्टादश द्वीपाः प्लक्षादिषट्कसैकादशविव रणपात्त्रयोदश ९६ १० अनुदर्श
दर्शी दर्शनं स पश्चाद्यस्म स्मृति युक्त्युपदेशस्तोऽनुदर्शीत्तं उपदेशामित्यर्थः पाठांतरेतु अनुदर्शी मांच के एवं राजचरितमितिशेषः तं यातयां प्रथममा

सनत्कुमारस्तं राजन्ब्रह्मलोकादुपेत्य ह अनुद
विप्रैः सविप्रर्षिभिश्चैव वीर्योन्मत्तः पुरूरवाः जहारच सविप्राणां रत्नान्युत्क्रोशतामपि १० सनत्कुमारस्तं राजन्ब्रह्मलोकादुपेत्य ह अनुद
र्शनतत्स्वक्रे प्रत्यगृह्णात्तच्चाप्यसौ ११ ततो महर्षिभिः क्रुद्धैः सद्यः सद्योव्यनश्यत लोभान्वितो बलमदान्नष्टसंज्ञो नराधिपः १२ स
हि गंधर्वलोकस्थ उर्वश्या सहितो विराट् आनिनाय क्रियार्थेऽग्नीन्यथावद्विहितांस्त्रिधा १३ षट् सुता जज्ञिरे चैलादायुर्धीमान
मावसुः दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः १४ नहुषं वृद्धशर्माणं रजिं रंभमनेनसं स्वर्भानवीसुतानेतानायोः सुतान्प्र
चक्षते १५ आयुषो नहुषः पुत्रो धीमान्सत्यपराक्रमः राज्यं शशास सुमहद्धर्मेण पृथिवीपते: १६ पितॄन्देवानृषीन्विप्रान्गंध
र्वोरगराक्षसान् नहुषः पालयामास ब्रह्म क्षत्रमथो विशः १७ स हत्वा दस्युसंघातानृषीन्करमदापयत् पशुवच्चैव तान्पृष्ठे वा
हयामास वीर्यवान् १८ कारयामास चेंद्रत्वमभिभूय दिवौकसः तेजसा तपसा चैव विक्रमेणौजसा तथा १९ ॥ ॥

सपयातपश्चादिस्यादौ दर्शनेन आमंत्ता नु प्रयोगयोस्तत्र इति अवधाने पिन दोषः ११ १३ विराट् विराजमानः त्रिधा गार्हपत्यदक्षिणाग्न्या
हवनीयभेदेन १७ आयुशब्द उकारांत संबोधन १४ १७ सहत्वेति ऋषिभ्यः करं जग्राहेत्यर्थः १८ कारयामासच कारस्वार्थोणिचते
जसा देहकांत्या विक्रमेण पराभिभवसामर्थ्येन ओजसा बुद्धींद्रियबलेन १९

२४ शाश्वतीः बह्वीः समाः वर्षाणि ३५ आर्छत प्राप्तवान् ३६ २७ साह्यं सोढुं योग्यं जराग्रहणाज्जं दुःखं कुरुत अंगीकुरुत साह्यं साहायकं

यतिं ययातिं संयातिमायातिमयतिं ध्रुवं नहुषो जनयामास षट्सुतान्प्रियवादिनः ३० यतिस्तु योगमास्थाय ब्रह्मभूतोभवन्मु
निः ययातिर्नाहुषः सम्राडासीत्सत्यपराक्रमः ३१ स पालयामास महीमीजे च बहुभिर्मखैः अतिभक्त्या पितॄनर्चन्देवांश्च
प्रयतः सदा ३२ अन्वगृह्णात्प्रजाः सर्वा ययातिरपराजितः तस्य पुत्रा महेष्वासाः सर्वैः समुदिता गुणैः ३३ देवयान्यां महाराज
शर्मिष्ठायां च जज्ञिरे देवयान्यामजायेतां यदुस्तुर्वसुरेव च ३४ द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे स शाश्वतीः समा राज
न्प्रजा धर्मेण पालयन् ३५ जरामार्छन्महाघोरां नाहुषो रूपनाशिनीं जराभिभूतः पुत्रान्स राजा वचनमब्रवीत् ३६ यदुं पु
रुं तुर्वसुं द्रुह्युं चानुं च भारत यौवनेन चरन्कामान्युवा युवतिभिः सह ३७ विहर्तुमहमिच्छामि साह्यं कुरुत पुत्रकाः तं पुत्रो
देवयानेयः पूर्वजो वाक्यमब्रवीत् ३८ किं कार्यं भवतः कार्यमस्माकं यौवनेन ते ययातिरब्रवीत्तं वै जरा मे प्रतिगृह्यतां ३९ यौ
वनेन त्वदीयेन चरेयं विषयानहं यजतो दीर्घसत्रैर्मे शापाच्चोशनसो मुनेः कामार्थः परिहीणो यं तप्येयं तेन पुत्रकाः ४० मा
मकेन शरीरेण राज्यमेकः प्रशास्तु वः अहं तन्वाभिनवया युवा कामानवाप्नुयाम् ४१ ते न तस्य प्रत्यगृह्णन्यदुप्रभृतयो जरां त
मब्रवीत्ततः पूरुः कनीयान्सत्यविक्रमः ४२

गा ३८ कार्यं प्रयोजनं कार्यं कर्तव्यं ३९ व्रतनिर्बंधात् शुक्रशापाच्च कामरूपः पुरुषार्थैर्हीनः ४० शरीरेण शरीरस्य जरया युक्तः इति शे
षः वः युष्माकं पंचेकामं कामं सुखं ४१ ४२ ॥ ॥

तेन ययातेव ज्ञात्वा तस्याः पूर्वरूपं ज्ञात्वा कालो पोवाऽर्षः ४३ ४७ कामानां कामभोगेन अवृत्तकामस्येव ययातेः स्वभावं ज्ञात्वा ४८ हविषा समिद्ध
ज्योतिना ४९ एकस्य कामिनः सर्वेनालं न पर्याप्तं शमं कामशान्तिं ५० सर्वथा कामशमेन ब्रह्मैव भवतीत्याह यदेति पापे कामे भूतेषु पंचभूतात्मकेषु
स्त्र्यादिषु विषयेषु च तत्सो हि कामस्यावस्थाः प्रसुप्तात न्वीविच्छिन्नाउदाराचा तत्र प्रसुप्ति लयमात्रावीजमात्रावशेषा प्रसुप्ता वाल नामात्र शेषेमनसि
स्थिता तन्वीतु तनुत्ववृत्तिकेन नासिरूपादिदर्शनेन उद्भूता मनोरथात्मिका विच्छिन्ना समाधिकालेन दामूला ज्ञानस्याभावात उदारा भोगकाले तत्र

राजेश्वरमितं ययातेन्त्वा यौवनगोचरः अहं जरां समादाय राज्ये स्थास्यामि तेजसा ४३ एवमुक्तः स राजर्षिस्तपोवीर्य
समाश्रयात् संचारयामास जरां तदा पुत्रे महात्मनि ४४ पौरवेणाथ वयसा राजा यौवनमास्थितः यायातेनापि वयसा राज
ज्यं पूरुरकारयत् ४५ ततो वर्षसहस्रान्ते ययातिरपराजितः स्थितः स नृपशार्दूलः शार्दूलसमविक्रमः ४६ ययाति रपिप
त्नीभ्यां दीर्घकालं विहृत्य च विश्वाच्या सहितो रेमे पुनश्चैत्ररथे वने ४७ नाध्यगच्छत्तदा तृप्तिं कामानां स महायशाः अवे
त्य मनसा राजन्निमां गाथां तदा जगौ ४८ न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥
४९ पृथिवी रत्नसंपूर्णा हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ५० यदा न कुरुते पापं सर्वभूतेषु क
र्हिचित् कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ५१

कर्मणेति उदारायाः वा वृत्तिः वा चेतित न्याः मनसेति प्रसुप्तायाः यदैवं तदैव ब्रह्म संपद्यते समाधौ विदेहकैवल्ये च तथा च श्रुतिः यदा सर्वे प्रमु
च्यंते कामा येस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सर्वं उदाराणां ५१ ॥ ॥ ॥ ॥

अयमेवकामः किंविधिद्विष्टः क्रोधोभवतिसोपित्वपरमः महापीनाशनीमइत्याहमराचेतिभयेष्वाद्वेषणहिंसादेवब्रह्मसंपद्यतइत्यर्थः ५२ का
मप्रवणांमनः बुद्ध्या कामतुच्छत्वनिश्चयेनसमाधायनिगृह्य ५३ अतृप्तइतिद्विधाहिकामनिवृत्तिः दोषदृष्ट्यातृप्त्याचतेनचविवेकविज्ञानोत्थेइति

यदा चायं न बिभेति यदा चास्मान्न बिभ्यति यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ५२ इत्यवेक्ष्य महाप्राज्ञः कामानां फल्गु
तां नृप समाधाय मनो बुद्ध्या प्रत्यगृह्णाज्जरां सुतात् ५३ दत्त्वा च यौवनं राजा पूरुं राज्येऽभिषिच्य च अतृप्त एव कामानां पूरुं पु
त्रमुवाच ह ५४ त्वया दायादवानस्मि त्वं मे वंशकरः सुतः पौरवो वंश इति ते ख्यातिं लोके गमिष्यति ५५ वैशंपायन उ० च
ततः स नृपशार्दूलः पूरुं राज्येऽभिषिच्य च ततः सुचरिते कृत्वा भृगुतुङ्गे महातपाः ५६ कालेन महता पश्चात्कालधर्ममुपेयिवान्
कारयित्वा त्वनशनं सदारः स्वर्गमाप्तवान् ५७ इत्यादिपर्वणि यायाते जनमेजय उ० च ययातिः पूर्वजोऽस्माकं दशमो यः प्र
जापतेः कथं स शुक्रतनयां लेभे परमदुर्लभां १ एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन आनुपूर्व्या च मे शंस राज्ञो वंशकरान्
पृथक् २ वैशंपायन उ० च ययातिरासीन्नृपतिर्देवराजसमद्युतिः तं शुक्रवृषपर्वाणौ वव्राते वै यथा पुरा ३ तत्तेऽहं संप्रवक्ष्या
मि पृच्छतो जनमेजय देवयान्याश्च संयोगं ययातेर्नाहुषस्य च ।४।

विवेकवृत्तोराज्ञः दोषदृष्ट्याकामेभ्योनिवृत्तातृप्तिस्त्वज्ञानाभावान्नहितृप्तिरितिभावः ५४ दायादवान्पुत्रवान् ५५ सुचरितेसत्कर्मभिर्भृगुतुङ्गे
पर्वतविशेषे ५६ कारयित्वाकृत्वापारयित्वेतिपाठेसमाप्य ५७ यायातेअध्यायः ययाति १ २ विप्रदानवौवव्रातेजामातृत्वेनेतिशेषः ३ ४

आः
१५६

सुराणामिति त्रैलोक्ये ऐश्वर्यविषये संघर्षे वयमीश्वरा भविष्यामो वयमीश्वरा भविष्याम इति स्पर्द्धा ५ जिगीषयेति सार्द्धश्लोकः याज्यार्थे अन्योन्य

सुराणामसुराणां च समजायत वै मिथः ऐश्वर्यं प्रति संघर्षस्त्रैलोक्ये सचराचरे ५ जिगीषया ततो देवा वव्रिरेंगिरसं
मुनिं पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ भृशं ७ तत्र देवा निजघ्नुर्यान्दानवान्युधि संग
तान् तान्पुनर्जीवयामास काव्यो विद्याबलाश्रयात् ततस्ते पुनरुत्थाय योधयां चक्रिरे सुरान् ८ असुरास्तु निजघ्नुर्यान्सुरान्समरमूर्द्धनि
न तान्संजीवयामास बृहस्पतिरुदारधीः ९ न हि वेद स तां विद्यां यां काव्यो वेद वीर्यवान् संजीविनीं ततो देवा विषादमगमन्परं १०
ते तु देवा भयोद्विग्नाः काव्यादुशनसस्तदा ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ११ भजमानान्भजस्वास्मान्कुरु नः साह्यमुत्तमं
यासौ विद्या निवसति ब्राह्मणेऽमिततेजसि १२ शुक्रे तामाहर क्षिप्रं भागभाग्नो भविष्यसि वृषपर्वसमीपे हि शक्यो द्रष्टुं त्वया द्विजः
१३ रक्षते दानवांस्तत्र न स रक्षत्यदानवान् तमाराधयितुं शक्तो भवान्पूर्ववयाः कविः १४ देवयानीं च दयितां सुतां तस्य महात्मनः
त्वमाराधयितुं शक्तो नान्यः कश्चन विद्यते १५ शीलदाक्षिण्यमाधुर्यैराचारेण दमेन च देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवं
१६ तथेत्युक्त्वा ततः प्रायाद्बृहस्पतिसुतः कचः तदाभिपूजितो देवैः समीपं वृषपर्वणः १७ स गत्वा त्वरितो राजन्देवैः संप्रेषितः कचः
असुरेंद्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाच ह १८ ऋषेरंगिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः नाम्ना कचमिति ख्यातं शिष्यं गृह्णातु मां भ
वान् १९ ॥

स्पर्द्धिनौ इति संबंधः ७ १३ रक्षते कर्मव्यतिहारे तङ् शुक्रो हि दानवान्रक्षति अयमस्मत्तोऽन्यत्र मा गादिति शुक्रः तान् रक्षत्येव अदानवान्देवान्त्वयम
न तु तज्जीवितान्रक्षति १४ १६ ॥

रामः
१५६

भृगोः पुत्रः कविस्तत्पुत्रः शुक्रः काव्यः स कविरित्युपचारादुच्यते। शुक्रेणाहूय शुक्रस्तेन २२ प्राप्तः कालं प्राप्तापन्ने च द्वितीयेति समासः प्राप्तकालं कचं २३

ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरो अनुमन्यस्व मां ब्रह्मन्सहस्रं परिवत्सरान् २० शुक्र उवाच कच सुस्वागतं तेऽस्तु प्रतिगृह्णामि ते वचः
अर्चयिष्येऽहमर्च्यं त्वामर्चितोऽस्तु बृहस्पतिः २१ वैशंपायन उवाच कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतं आदिष्टं कविपुत्रेण शु
क्रेणोशनसा स्वयं २२ व्रतस्य प्राप्तकालं स यथोक्तं प्रत्यगृह्णत आराधयन्नुपाध्यायं देवयानीं च भारत २३ नित्यमाराधयिष्यं
स्तां युवा यौवनगोचरे गायन्नृत्यन्वादयंश्च देवयानीमतोषयत् २४ संशीलयन्देवयानीं कन्यां संप्राप्तयौवनां पुष्पैः फलैः प्रे
षणैश्च तोषयामास भारत २५ देवयान्यपि तं विप्रं नियमव्रतधारिणं गायंती च ललयंती च रहः पर्यचरत्तथा २६ पंचवर्षश
तान्येवं कचस्य चरतो व्रतं तत्रातीयुरथो बुध्वा दानवास्तं ततः कचं २७ गा रक्षंतं वने दृष्ट्वा रहस्येकममर्षिताः जघ्नुर्बृहस्पतेर्द्वे
षाद्विप्रारक्षार्थमेव च २८ हत्वा शालावृकेभ्यश्च प्रायच्छंल्लवशः कृतं ततो गावो निवृत्तास्ता अगोपाः स्वन्निवेशनं २९
ता दृष्ट्वा रहिता गास्तु कचेनाभ्यागता वनात् उवाच वचनं काले देवयान्यथ भारत ३० देवयान्युवाच अहुतं चाग्नि
होत्रं ते सूर्यश्चास्तं गतः प्रभो अगोपाश्चागता गावः कचस्तात न दृश्यते ३१ व्यक्तं हतो मृतो वापि कचस्तात भविष्यति तं विना न
च जीवेयमिति सत्यं ब्रवीमि ते ३२ ॥

२४ प्रेषणैः प्रेष्यत्वादिभिः २५ २६ अतीयुः ब्राह्मणस्यावधानमतिक्रांतवंत इत्यर्थः २७ २९ उवाच शुक्रं प्रति ३० ३१ ३२ ४ ॥ ४

आ०
१५७

संशब्दशरंहृत्वा ३४ ३५ भाविनिहेमुद्भावयति ३६ ३७ पेषः पिष्टंपिष्टीकृतेत्यर्थः पेषीकृत्येतिसमासेपिल्कोल्यबादेशाभावश्चार्षः समसंप

शुक्रउ च अयमेहीतिसंशब्दमृतंसंजीवयाम्यहं ततः संजीवनीं विद्यां प्रयुज्य कचमाह्वयत् ३३ भित्त्वा भित्त्वा शरीराणि वृकाणां स वि
निर्गतः आहूतः प्रादुरभवत्कचो हृष्टोथ विद्यया ३४ कस्माच्चिरायितोसीति पृष्टस्तामाह भार्गवीं समिधश्च कुशादीनि काष्ठभारं च भावि
नि ३५ गृहीत्वाहं श्रमभारार्तो वटवृक्षं समाश्रितः गावश्च सहिताः सर्वा वृक्षच्छायामुपाश्रिताः ३६ असुरास्तत्र मां दृष्ट्वा कस्त्वमि
त्यभ्यचोदयन् बृहस्पतिसुतश्चाहं कच इत्यभिविश्रुतः ३७ इत्युक्तमात्रे मां हत्वा पेषीकृत्वा तु दानवाः दत्त्वा शालावृकेभ्यस्तु स
स्त्वं जग्मुः स्वमालयं ३८ आहूतो विद्यया भद्रे भार्गवेण महात्मना त्वत्समीपमिहायातः कथंचित्समजीवितः ३९ हतोहमिति
वाचख्यौ पृष्टो ब्राह्मणकन्यया स पुनर्देवयान्योक्तः पुष्पाहारो यदृच्छया ४० वनं ययौ कचो विप्रो ददृशुर्दानवाश्च तं पुनस्तं पे
षयित्वा तु समुद्राम्भस्यमिश्रयन् ४१ चिरं गतं पुनः कन्या पित्रे तं सन्यवेदयत् विप्रेण पुनराहूतो विद्यया गुरुदेहजः पुनरावृत्य त
द्वृत्तं न्यवेदयत तद्यथा ४२ ततस्तृतीयं हत्वा तं दग्ध्वा कृत्वा च चूर्णशः प्रायच्छन्ब्राह्मणायैव सुरायामसुरास्तदा ४३ दे
वयान्यथ भूयोपि पितरं वाक्यमब्रवीत् पुष्पाहारः प्रेषणकृत्कचस्तात न दृश्यते ४४ व्यक्तं हतो मृतो वापि कचस्तात भविष्यति
तं विना न च जीवेयं कचं सत्यं ब्रवीमि ते ४५ शुक्रउ च बृहस्पतेः सुतः पुत्रि कचः प्रेतगतिं गतः विद्यया जीवितोप्येवं हन्यते क
रवाम किं ४६ ॥

र्जीवितं यस्य सः समजीवितः अंतरामरणो हि अप्राप्तविद्यत्वात्प्रयंजीवनमिति भावः ३९ ४२ गुरुदेहजः कचः आवृत्य आगत्य तद्वृत्तं असुरचेष्टितं ४२ ब्राह्मणाय शुक्राय ४३ प्रेषणकृत् कार्यकर्ता ४४ ४५ ४६ ॥

राम:
१५७

मर्सत्वंतु मत्प्रभावादस्मकात्योसि। ब्रह्मवेदः तस्मानमतंस्वार्थप्रकाशनेन ४७ प्रभावानिति शेषः उपस्थाने संध्योपस्थानकाले त्रिसंध्यामितर्थः ४८ ५० स
माक्षयत् आक्रोशं हृतवान् संरंभात् क्रोधात् सर्वान्ते स्थानेकमाहूय उपालब्धवानितर्थः। उपालंभमेवाह। असंशयमिति द्विषंतीति मध्यमपुरुषप्रयोगः क्रोधावे

मेवं शुचो माहृदेवयानि न त्वादृशी मर्त्यमनुप्रशोचते यस्यास्तव ब्रह्म च ब्राह्मणाश्च सेंद्रा देवा वसवोथाश्विनौ च ४७ सुराद्विषश्चै
व जगच्च सर्वमुपस्थाने संनमंति प्रभावात् अशक्यो सौ जीवयितुं द्विजातिः संजीवितो वध्यते चैव भूयः ४८ देवयान्युवाच य
स्यांगिरा वृद्धतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः ऋषेः पुत्रं तमथो वापि पौत्रं कथं न शोचेयमहं न रुद्यां ४९
स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्मसु चैव दक्षः कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात कचोभिरूपः ५० वैशं
पायनउवाच संपीडितो देवयान्या महर्षिः समाह्वयत् संरंभाच्चैव काव्यः असंशयं मामसुरा द्विषंति ये मे शिष्यानागतान्सूद
यंति ५१ अब्राह्मणं कर्तुमिच्छंति रौद्रा एते मां यथा ह्यभिचरंति नित्यं अप्यस्य पापस्य भवेदिहांतः कं ब्रह्महत्या न दहेदपी
द्रं ५२ गुरोर्हि भीतो विद्यया चोपहूतः शनैर्वाक्यं जठरे व्याजहार तमब्रवीत्केन पथोपनीतस्त्वं चोदरे तिष्ठसि ब्रूहि विप्र ५३
कचउवाच तव प्रसादान्न जहाति मां स्मृतिः स्मरामि सर्वं यच्च यथा च वृत्तं न त्वेवं स्यात्तपसः संक्षयो मे ततः क्लेशं घोरमिमं
सहामि ५४

शासत्वनार्थः ५१ मां अब्राह्मणं उदरे कचस्य पाकेन ब्रह्महत्याप्रसंजनेन कर्तुमिच्छंति अभिचरंति विरुद्धमाचरंति मदुदरे ब्राह्मणप्रवेशनेन अंतः परिणा
कः ५२ ५३ तपसः संक्षयो गुरूदरविदारणात् क्लेशं संकीर्णोदरे वासजं ५४

चोद्वीमायां मामा स्पष्टविदित्रलिपि सति कोऽर्दितोऽसुरैर्ब्राह्मणो वाऽतिक्रामेत अतल्लद्धुरमे दत्ते मम मद्दुःसाध्यमेवेति भावः ५५ ५७ न चेदिंद्रः इंद्रश्चेत्वं तर्हि
त्वोऽदरे जीर्णीकरिष्याम्येवेति भावः ५८ न तिष्ठेत् ब्राह्मणात्वा द्विधामि मा पद्यः ५९ भावय जीवय भावितो मया जीवितः कृतज्ञो माऽभूरिति भावः ६० शुक्ल
स्य कृष्णे आवेर्तात्रयेप शुक्लात्यये ६१ ब्रह्मराशिं वेदराशिं ६२ यः श्रोत्रयोरिति यथा ममश्रोत्रयोरयं शुक्रः अमृतं अमरणसाधनां विद्यां निषिक्तवान् तथा

असुरैः सुरायामभवसोस्मिदत्तो हत्वादग्ध्वाचूर्णयित्वाचकाव्यं ब्राह्मींमायांचासुरींविप्रमायांत्वयिस्थितेकथमेवातिवर्तेत
५५ शुक्रउवाच किंतेप्रियंकरवाण्यद्यवत्सेवधेनमेजीवितंस्यात्कचस्य नान्यत्रकुक्षेर्ममभेदनेनदृश्येत्कचोमद्गतोदेवया
नि ५६ देवयान्युवाच द्वौमांशोकावग्निकल्पौदहेतांकचस्यनाशस्तवचैवोपघातः कचस्यनाशेममशर्मनास्तितवोप
घातेजीवितुंनास्मिशक्ता ५७ शुक्रउ च संसिद्धरूपोसिबृहस्पतेःसुतयत्त्वांभक्तंभजतेदेवयानी विद्यामिमांप्राप्नु
हिजीवनींत्वंनचेदिंद्रःकचरूपीत्वमद्य ५८ ननिवर्तेत्पुनर्जीवन्कश्चिदन्योममोदरात् ब्राह्मणंवर्जयित्वैकंतस्मा
द्विद्यामवाप्नुहि ५९ पुत्रोभूत्वाभावयभावितोमामस्माद्देहादुपनिष्क्रम्यतात समीक्षेथाधर्मवतीमवेक्षांगुरोःसकाशा
त्प्राप्यविद्यांसविद्यः ६० वैशंपायनउ च गुरोःसकाशात्समवाप्यविद्यांभित्वाकुक्षिंनिर्विचक्रामविप्रःकचोभिरूप
स्तत्क्षणाद्ब्राह्मणस्यशुक्लात्ययेपौर्णमास्यामिवेंदुः ६१ दृष्ट्वाचतंपतितंब्रह्मराशिमुत्थापयामासमृतंकचोपि विद्यांसि
द्धांतामवाप्याभिवाद्यततः कचस्तंगुरुमित्युवाच ६२ यःश्रोत्रयोरमृतंसंनिषिंचेद्विद्यामविद्यस्ययथाममायं तंमन्येहंपित

ऽन्योपि यो नेममनविद्यस्य विद्याप्रदस्य समासेपिनज्ञः न भ्राडादिवत्स्कृतिभावः श्रोत्रयोः सत्व ६३ मातरंचतस्मैनद्रुह्येत्कृतमस्यजानन् ६३
स्तं निषिंचेत् यः पतः सतपुरस्तमार्षत अमृतं मोक्षरूपां तं निषेकारं अर्हं पितरं मातरं च मन्यात तस्मै निषेक्त्रे न द्रुह्येत्तत्कः प्रसत्कृतं श्रेने न उपकृतं जानन्न द्रुह्येत् कु

अतस्य कर्मेष्या तिष्ठानकं उत्तमकस्य वेदस्य निधीनां विद्यानां निधिं आश्रयं विद्यायाः निधिस्त्वं गोपाय मा शेवधिष्टेहमस्मीति विद्याब्रचनात् मां शेवधिनिधिः प्रतिष्ठा
विद्याफलं तत्पूर्व्याः अप्रतिष्ठाः निधीनां चतुरन्वयामिति पाठे अध्ययने अर्थज्ञाने अनुष्ठाने शिष्येभ्यः प्रतिपादने चेति चत्वारि कर्माणि तेषु अन्वयः संबंधो येषां निधीनां विद्या

अतस्य दानारमतुत्तमस्य निधिं निधीनामपि लब्धविद्याः येनाद्रियंते गुरुमर्चनीयं पापांल्लोकांस्ते व्रजेयुः प्रतिष्ठा ६४ वैशंपायन उ॰ च सुरापा
नाद्वंचनां प्राप्य विद्वान्संज्ञानाशं चैव महातिघोरं दृष्ट्वा कचं चापि तथाभिरूपं पीतं तदा सुरया मोहितेन ६५ समन्युरुत्थाय महानुभावस्तदोश
नाविप्रहितं चिकीर्षुः सुरापानं प्रति संजातमन्युः काव्यः स्वयं वाक्यमिदं जगाद ६६ यो ब्राह्मणोद्य प्रभृतीह कश्चिन्मोहात्सुरां पास्यति मंदबुद्धिः
अपेतधर्मो ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात्परे च ६७ मया चैतां विप्रधर्मोक्तिसीमां मर्यादां वै स्थापितां सर्वलोके संतो विप्राः शु
श्रुवांसो गुरूणां देवा लोकाश्चोपशृण्वंतु सर्वे ६८ इतीदमुक्त्वा स महानुभावस्तपोनिधीनां निधिरप्रमेयः तान्दानवान्दैवविमूढबुद्धीनि
दं समाहूय वचोभ्युवाच ६९ आचक्षे वो दानवा बालिशाः स्थ सिद्धः कचो वत्स्यति मत्सकाशे संजीविनीं प्राप्य विद्यां महात्मा तुल्यप्रभावो
ब्राह्मणो ब्रह्मभूतः ७० एतावदुक्त्वा वचनं विरराम स भार्गवः दानवा विस्मयाविष्टाः प्रययुः स्वनिवेशनं ७१ गुरोरुष्य सकाशे तु दश व
र्षशतानि सः अनुज्ञातः कचो गंतुमियेष त्रिदशालयं ७२ इत्यादिपर्वणि षट्सप्ततितमोऽध्यायः ॥ ॥

नाभिरूपः ६४ ६९ बालिशाः मतोरेक वचसमान यिवाशीघ्रं न कार्यसिद्धं कृतवंतः ७० ७१ उष्य उषित्वा ७२ अध्यायः ॥ ॥ ॥ ॥ ॥

श्री० समावृत्तव्रतंसन्तापन्नव्रतं १८ गुरुःपुत्रोयस्यअंगिरसःपुत्रःपौत्रः ९ १० ११ १२ १३ १४ उल्छिनाअनलसा १५ ॥ ॥ ॥
१५९

वैशंपायनउ च समावृत्तव्रतंतेनविसृष्टंगुरुणातदा प्रस्थितंत्रिदशावासंदेवयान्यब्रवीदिदं १ ऋषेरंगिरसःपौत्रवृत्तेनाभिजनेनच भ्राज
सेविद्ययाचैवतपसाचदमेनच २ ऋषिर्यथांगिरामान्यःपितुर्ममहायशाः तथामान्यश्चपूज्यश्चममभूयोबृहस्पतिः ३ एवंज्ञात्वाविजानीहियत्
ब्रवीमितपोधन व्रतस्थेनियमोपेतेयथावर्त्ताम्यहंत्वयि ४ ससमावृत्तविद्योमांभक्तांभजितुमर्हसि गृहाणपाणिंविधिवन्ममंत्रपुरस्कृतं ५
कचउ च पूज्योमान्यश्चभगवान्यथातवपितामम तथात्वमनवद्यांगिपूजनीयतमामम ६ प्राणेभ्योपिप्रियतराभार्गवस्यमहात्मनः त्वंभद्रेधर्मतः
पूज्यागुरुपुत्रीसदामम ७ यथाममगुरुर्नित्यंमान्यःशुक्रःपितातव देवयानितथैवत्वंनैवंमांवक्तुमर्हसि ८ देवयानु च गुरुपुत्रस्यपुत्रोवैन
त्वंपुत्रश्चमेपितुः तस्मात्पूज्यश्चमान्यश्चममापित्वंद्विजोत्तम ९ असुरैर्हन्यमानेचकचत्वयिपुनःपुनः तदाप्रभृतियाप्रीतिस्तांत्वमद्यस्मरस्वमे
१० सौहार्देचानुरागेचवेत्थमेभक्तिमुत्तमां नमामर्हसिधर्मज्ञत्यक्तुंभक्तामनागसं ११ कचउवाच अनियोज्येनियोगेमांनियुनंक्षिशुभव्र
ते प्रसीदसुभ्रुत्वंमह्यंगुरोर्गुरुतराशुभे १२ यत्रोषितंविशालाक्षित्वयाचंद्रनिभानने तत्राहमुषितोभद्रेकुक्षौकाव्यस्यभाविनि १३ भगिनीध
र्मतोमेत्वंमैवंवोचःसुमध्यमे सुखमस्म्युषितोभद्रेनमन्युर्विद्यतेमम १४ आपृच्छेत्वांगमिष्यामिशिवमाशंसमेपथि अविरोधेनधर्मस्यस्म
र्त्तव्योस्मिकथांतरे अप्रमत्तोत्थितानित्यमाराधयगुरुंमम १५ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम:
१५९

१६ अननुज्ञातस्त्वद्गुरुणा कार्ये १७ आर्षं ऋषिप्रणीतं सोऽहं विवाहं कामतः शप्तोऽस्मि न धर्मतः १८ २२ अप्रणाशितानाम्प्रणां कृतिभागभाक्भागः अयमेव कचो वेदेशंपु
शप्तेनोचे। यदेवा ब्राह्मणोक्तोऽश्रद्धानो ऽग्निर्जातं शंयुमेव तस्य ग्राहस्य तं यज्ञस्य शीर्ष छिनत् एतन्ममेत्यब्रवीति किं मे प्रजाया इति यो यशुरानैश्चनेम यातयामो निहन्तस्मै हस्ते

देवयान्तु च यदि मां धर्मकार्यार्थं प्रत्याख्यास्यसि याचितः ततः कच न ते विद्या सिद्धिमेषागमिष्यति १६ कचउ च गुरुपुत्रीति कृत्वाहं प्रत्या
चक्षे न दोषतः गुरुणा चाननुज्ञातः काममेवं शपस्व मां १७ आर्षं धर्मं ब्रुवाणोऽहं देवयानि यथा त्वया शप्तो नार्होऽस्मि शापस्य कामतोऽद्य न धर्मतः
१८ तस्माद्भवत्या यः कामो न तथा स भविष्यति ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति १९ फलिष्यति न ते विद्या यत्त्वं मामात्थ तत्तथा
अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति २० वैशंपायनउ च एवमुक्त्वा द्विजश्रेष्ठो देवयानीं कचस्तदा त्रिदशेशालयं शीघ्रं जगाम द्विजसत्त
म २१ तमागतमभिप्रेक्ष्य देवा इंद्रपुरोगमाः बृहस्पतिं सभाज्येदं कचं वचनमब्रुवन् २२ देवा ऊचुः यत्त्वयास्मद्धितं कर्म कृतं वै परमाद्भुतं न
ते यशः प्रणाशितं भागभाक्च भविष्यसि २३ इत्यादिपर्वणि ययात्याने वैशंपायनउवाच, कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः कचादधीत्य तां
विद्यां कृतार्था भरतर्षभ १ सर्व एव समागम्य शतक्रतुमथाब्रुवन् ॥ कालस्ते विक्रमस्याद्य जहि शत्रून्पुरंदर २ एवमुक्तस्तु सहितैस्त्रिदशैर्म
घवांस्तदा तथेत्युक्त्वा प्रचक्राम सोऽपश्यत वने स्त्रियः ३ ॥

णायातयाघोलोहितं करवघावतः प्रस्कद्यपांसन्संगच्छाता वतः संवत्सरामित्त्वलोकं न प्राज्ञानादिति तस्माद्ब्राह्मणाय नापगुरेत न निहन्यान्न लोहितं कुर्यादिति श्रुतो
वरतन्द्राकु। अपगुरेत नगालयेत् शतानां योनरकविशेषाः २३ अध्यायः कृतः १ ३ अध्यायः कृतः १ मघवान् इंद्रः मखेषु मघावत्त्वसावित्ति महद्भिः प्रचक्राम अभूत
लं प्रतीति शेषः ३ ॥

आ· वायुभूतइंद्रः कन्याइयचारासुक्षा दानवयोः विरोधोमादनार्थे ४ ७ समुदाचारः सदाचारः ८ आहूम्वसेतिति अत्रयथाईइंद्रेणसुनातहेषमत्त्रत्रमित्र अतः सिपुचेति
१६० बहुलंछंदसीतिवाहुलकाद्विकरणोत्रपंस्वमिहाप्यार्षत्वात्श्नुःशएचेतिविकरणद्वयंआहूम्वस्वआमिसुखेनवक्रस्ताडनादिनासंतापंप्राप्नुहिविहृत्वस्वपासुखुलंट

क्रीडंतीनांतुकन्यानांवनेचैत्ररथोपमे वायुभूतःसवस्त्राणिसर्वाण्येवव्यमिश्रयत ४ ततोजलात्समुत्तीर्यकन्यास्ताःसहितास्तदा वस्त्राणित्र
गृहुस्तानियथासन्नान्यनेकसः ५ तत्रवासोदेवयान्याःशर्मिष्ठाजगृहेतदा व्यतिमिश्रमजानंतीदुहितावृषपर्वणः ६ ततस्तयोर्मिथस्तत्र
विरोधःसमजायत देवयान्याश्चराजेंद्रशर्मिष्ठायाश्चतत्कृते ७ देवयान्युवाच कस्माद्गृह्णासिमेवस्त्रंशिष्याभूत्वाममासुरी समुदाचारहीं
नायानतेसाधुभविष्यति ८ शर्मिष्ठोवाच आसीनंचशयानंचपितातेपितरंमम सौतिवंदीवचाभीक्ष्णंनीचैःस्थित्वाविनीतवत ९ याच
तस्त्वंहिदुहितास्तुवतःप्रतिगृह्णतः सुताहंस्तूयमानस्यददतोप्रतिगृह्णतः १० अनायुधासायुधायारिक्ताक्षुभ्यसिभिक्षुकि लप्स्यसेप्रति
योद्धारंनहित्वागणयाम्यहं ११ वैशंपायनउवाच समुच्छ्रयंदेवयानींगतांसक्तांचवाससि शर्मिष्ठाप्राक्षिपत्कूपेततःस्वपुरमागमत १२
हतेयमितिविज्ञायशर्मिष्ठापापनिश्चया अनवेक्ष्ययपौवेश्मक्रोधवेगपरायणा १३ अथतंदेशमभ्यागाद्ययातिर्नहुषात्मजः श्रांतयुग्यः
श्रांतहयोमृगलिप्सुःपिपासितः १४ ॥

नाहिनाद्रुघद्रोहिंचिरकालिकंक्रोधंकुरुकुप्यस्वसघः परानिष्टफलोयत्नः कार्यःतंकुरुहरिक्तादरिक्ता प्रतियोद्धारंप्रहर्तारंशत्रुंमामेव ११ समुच्छ्रयसमवचने
नमहत्वे १२ १३ युग्यारथवाहकाःहयाःकेवलाश्वाः १४ ॥ राम:
१६०

उदकंपीयतेस्मादितिउदपानंकूपं १५ वल्गुनामंजुना १६ श्यामाषोडशवार्षिकीयौवनारूढासमस्तानिरिख्याति १७ वीरुधःलताः १८ २१ अवटात्गर्त्तात्

सनाहुषःप्रेक्षमाणउदपानंगतोदकं ददर्शराजातांतत्रकन्यामग्निशिखामिव १५ तामपृच्छत्सदृष्ट्वैवकन्याममरवर्णिनीं सांत्वयित्वानृपश्रेष्ठः
साम्नापरमवल्गुना १६ कात्वंताम्रनखीश्यामासुमृष्टमणिकुंडला दीर्घंध्यायसिचात्यर्थंकस्माच्छोचसिचातुरा १७ कथंचपतितास्यस्मिन्कू
पेवीरुत्तृणावृते दुहिताचैवकस्यत्वंवदसत्यंसुमध्यमे १८ देवयान्युवाच योसौदेवैर्हतान्दैत्यानुत्थापयतिविद्यया तस्यशुक्रस्यकन्याहंसमांनूनंन
बुध्यते १९ एषमेदक्षिणोराजन्पाणिस्ताम्रनखांगुलिः समुद्धरगृहीत्वामांकुलीनस्त्वंहिमेमतः २० जानामिहित्वांसंशांतंवीर्यवंतंयशस्विनं त
स्मान्मांपतितामस्मात्कूपादुद्धर्तुमर्हसि २१ वैशंपायनउवाच तामथब्राह्मणींराजाविज्ञायनहुषात्मजः गृहीत्वादक्षिणेपाणावुज्जहारततोवटा
त् २२ उद्धृत्यचैनांतरसातस्मात्कूपान्नराधिपः आमंत्रयित्वासुश्रोणींययातिःस्वपुरंययौ २३ गतेतुनाहुषेतस्मिन्देवयान्यप्यनिंदिता उवाचशो
कसंतप्ताघूर्णिकामागतांपुरः २४ देवयान्युवाच त्वरितेघूर्णिकेगच्छशीघ्रमाचक्ष्वमेपितुः नेदानींसंप्रवेक्ष्यामिनगरंवृषपर्वणः २५ वैशंपा
यनउवाच सातत्रत्वरितंगत्वाघूर्णिकासुरमंदिरं दृष्ट्वाकाव्यमुवाचेदंसंभ्रमाविष्टचेतना २६ आचचक्षेमहाप्राज्ञंदेवयानींवनेहतां शर्मिष्ठ
यामहाभागदुहित्रावृषपर्वणः २७ श्रुत्वादुहितरंकाव्यस्तत्रशर्मिष्ठयाहतां त्वरयानिर्ययौदुःखान्मार्गमाणःसुतांवने २८ ॥ ॥

२२ २३ घूर्णिकोदासी २४ २६ हतांताडितां २७ २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ: २९ नियच्छंति प्रयच्छंति आत्मदोषैर्हेतुभिः स्वकर्मभिरेव सुखदुःखे जना आप्येते न तु जनस्यापराधस्त्वयेः एतदेवाह मन्ये इति निष्कृतिः फलभोगेन निरसनं ३० ३१ तीक्ष्णा
१६१ समेभिस्त्वयाः परुषं निष्ठुरं उक्तो ३२ इदं पूर्वोक्तं ३४ ३६ नाहुषः ययातिः ममैश्वर्यं निर्दिष्टं अप्रतिपन्नं बलमस्ति ३७ ईश्वरत्वमेवाह पयस्त्वेति सयपं भुवानत्वमसी

इत्थं दुहितरं काव्यो देवयानीं ततो वने बाहुभ्यां संपरिष्वज्य दुःखितो वाक्यमब्रवीत् २९ आत्मदोषैर्नियच्छंति सर्वे दुःखसुखे जनाः मन्ये दुश्चरितं तेन
लिप्यस्य यन्निष्कृतिः कृताः ३० देवयान्तु च निष्कृतिमित्कृत्वा मात्स्त्यकृता वहितो मम शर्मिष्ठया यदुक्तास्मि दुहित्रा वृषपर्वणः ३१ सत्यं कि
लैनस्याप्राह दैत्यानामस्तगायनः एवं हि मे कथयति शर्मिष्ठा वार्षपर्वणी ३२ वचनं तीक्ष्णापरुषं क्रोधरक्तेक्षणा भृशं स्तुवतो दुहिता नित्यं याचतः
प्रतिगृह्णतः अहं तु स्तूयमानस्य ददतोप्रतिगृह्णतः ३३ इदं मामाह शर्मिष्ठा दुहिता वृषपर्वणः क्रोधसंरक्तनयना दर्पपूर्णा पुनः पुनः ३४ ॥
यद्यहं स्तुवतस्तात दुहिता प्रतिगृह्णतः प्रसादयिष्ये शर्मिष्ठामित्युक्ता तु सखी मया ३५ शुक्र उवाच स्तुवतो दुहिता न त्वं याचतः प्रतिगृ
ह्णतः अस्तोतुः स्तूयमानस्य दुहिता देवयान्यसि ३६ वृषपर्वैव तद्वेद शक्रो राजा च नाहुषः अचिंत्यं ब्रह्म निर्द्वंद्वमैश्वर्यं हि बलं मम ३७
यच्च किंचित्सर्वगतं भूमौ वा यदि वा दिवि तस्याहमीश्वरो नित्यं तुष्टेनोक्तः स्वयंभुवा ३८ अहं जलं विसृजामि प्रजानां हितकाम्यया पुष्णाम्यौष
धयः सर्वा इति सत्यं ब्रवीमि ते ३९ ॥

त्वादिना वेदेन कारणेनानुष्ठेन गुरुणोतिशेषः ३८ अहं मनुरभवं सूर्यश्चेति वस्तनामदेवश्वस्यसार्वात्म्यानुभवमाह अहमिति ३९ ॥ ॥ ॥ ॥ राम०
१६१

४० ययातेध्यायः। अतिवादान् निंदावचनानि १ रश्मिषु क्रोधफलभूतास्वापत्सु पक्षे स्तोर्यः २ अक्रोधेन क्रोधविरोधिन्या क्षमया ३ ७ अर्थस्य

वैशंपायन उ॰ च एवं विषादमापन्नां मन्युना संप्रपीडितां वचनैर्मधुरैः श्लक्ष्णैः सांत्वयामास तां पिता ४० इत्यादिपर्वणि यायाते शुक्र उ॰ च
यः परेषां नरो नित्यमतिवादांस्तितिक्षते देवयानि विजानीहि तेन सर्वमिदं जितं १ यः समुत्पतितं क्रोधं निगृह्णाति हयं यथा स यन्तेत्युच्यते सद्भिर्न यो
रश्मिषु लंबते २ यः समुत्पतितं क्रोधमक्रोधेन निरस्यति देवयानि विजानीहि तेन सर्वमिदं जितं ३ यः समुत्पतितं क्रोधं क्षमयेह निरस्यति यथोरग मा॰ टि॰ ४
स्त्वचं जीर्णां स वै पुरुष उच्यते ४ यः संधारयते मन्युं योतिवादांस्तितिक्षते यश्च तप्तो न तपति दृढं सोर्थस्य भाजनं ५ यो यजेदपरिश्रान्तो मासि मासि शतं समाः
न क्रुध्येद्यश्च सर्वस्य तयोरक्रोधनोधिकः ६ यं कुमाराः कुमार्यश्च वैरं कुर्युरचेतसः न तत्प्राज्ञोनुकुर्वीत न विदुस्ते बलाबलं ७ देवयान्यु॰ च वे
द्माहं तात बालापि धर्माणां यदिहान्तरं अक्रोधे चातिवादे च वेद चापि बलाबलं ८ शिष्यस्याशिष्यवृत्तेर्हि न क्षन्तव्यं बुभूषता तस्मात्संकीर्णवृ
त्तेषु वासो मम न रोचते ९ पुमांसो ये हि निंदंति वृत्तेनाभिजनेन च न तेषु निवसेत्प्राज्ञः श्रेयोर्थी पापबुद्धिषु १० ये त्वेनमभिजानंति वृत्तेना
भिजनेन वा तेषु साधुषु वस्तव्यं स वासः श्रेष्ठ उच्यते ११ वाक्(सु)कं महाघोरं दुहितुर्वृषपर्वणः मथ्नाति हृदयमग्निकाम इवारणिं १२

पुरुषार्थचतुष्टयस्य ५ यजेतपित्र्येसेन नस्मान्मासि पितृभ्यः क्षिपत इति क्रोतेः एतेन अमयजेभ्यः पित्र्यन्तः श्रेष्ठ इति सूचितं ६ यदिति अचेतसो मूढाः बाल्यात
शर्मिष्ठया कृतं अस्माभिः क्षंतव्यमेवं सर्पः ७ ८ ९ १० ११ १२ ॥

आः
१६२

ययातेऽध्यायः ततः काव्यः कविपुत्रः समन्युः सक्रोधः १ पुत्रेष्विति ननु पितृकृतं पुत्रेण भुज्यते चेत् शास्त्रफलं प्रयोक्तरीति न्यायविरोधापत्तिरिति चेन्न मो वै भा
गिनं भ्रातृदत्ते चयते वैनं स यदि वैनेन चयते पुत्रमथ पौत्रं चयत इति धनमानभागिनो दूरीकरणाद्वस्य पुत्रः पौत्रो वा नश्यतीति श्रुतेः न्यायस्य तु जातेष्ट्यादिवत्पुत्र

सु ३

न ह्यतो दुष्करतरं मन्ये लोकेष्वपि त्रिषु यः सपत्नश्रियं दीप्तां हीनश्रीः पर्युपासते २३ इत्यादिपर्वणि यायाने वैशंपायनउ च ततः काव्यो भृ
गुश्रेष्ठः समन्युरुपगम्य ह वृषपर्वाणमासीनमित्युवाचाविचारयन् १ नाधर्मश्चरितो राजन्सद्यः फलति गौरिव पुत्रेषु वा नप्तृषु वा न चेदात्म
नि पश्यति २ फलत्येव ध्रुवं पापं गुरुभुक्तमिवोदरे यद्घातयथा विप्रं कचमांगिरसं तदा अपापशीलं धर्मज्ञं शुश्रूषुं मद्गृहे रतं ३ वधादनर्ह
तस्तस्य वधाच्च दुहितुर्मम वृषपर्वन्निबोधेदं त्यक्ष्यामि त्वां सबांधवं ४ स्थातुं त्वद्विषये राजन्न शक्ष्यामि त्वया सह अहो मामभिजानासि दैत्य मि
थ्याप्रलापिनं यथेममात्मनो दोषं न नियच्छस्युपेक्षसे ६ वृषपर्वा च नाधर्मं न मृषावादं त्वयि जानामि भार्गव त्वयि धर्मश्च सत्यं च तत्प्रसीदतु नो
भवान् ७ यद्यस्मानपहाय त्वमितो गच्छसि भार्गव समुद्रं संप्रवेक्ष्यामो नान्यदस्ति परायणं ८ शुक्रउ च समुद्रं प्रविशध्वं वा दिशो वा द्रवता
सुराः दुहितुर्नाप्रियं सोढुं शक्तोऽहं दयिता हि मे ९ प्रसाद्यतां देवयानी जीवितं यत्र मे स्थितं योगक्षेमकरस्तेऽहमिंद्रस्येव बृहस्पतिः १० वृषप
र्वा च यत्किंचिदसुरेंद्राणां विद्यते वसु भार्गव भुवि हस्तिगवाश्वं च तस्य त्वं मम चेश्वरः ११ शुक्रउ च यत्किंचिदस्ति द्रविणं दैत्येंद्राणां महासु
र तस्येश्वरोऽस्मि यद्येषा देवयानी प्रसाद्यतां १२ ॥

गतमपि फलं तदैकात्म्याभिमानात्पितर्यपि वक्तुं शक्यमतो न यथाकोपः भर्तापि पितरि पुत्राणां दारिद्र्यदौर्जन्मादिना आद्यलोपादिकृतं तद्दुःखादिफलमत्वैवेति सष्ट
कपुत्रेषु वेत्यादि ३ ४ उपेक्षसे शपथमात्रेण मां सांत्वयसि न तु दंडं निगच्छसि ६ ७ ८ ९ १० ११ १२ ॥ ॥ ॥ ॥

देवं १

राम०
१६२

महाकविरिमादिदृष्यगवाक्यं १३ १५ दासीमितिइदंदेवयान्याप्रार्थितंदासीसहस्त्रंशर्मिष्ठापरिवारभूतादासीसहस्त्राद्न्यतद्वाभ्यांकन्यासहस्त्राभ्यांमितिवाक्यशेषात् १६

वैशंपायनउ च एवमुक्तस्तयेत्याहवृषपर्वामहाकविः देवयान्यंतिकेगत्वातमर्थंप्राहभार्गवः १३ देवयान्यु च यदित्वमीश्व
रस्तातराज्ञोवित्तस्यभार्गव नाभिजानामितत्तेहंराजात्ववदतुस्वयं १४ वृषपर्वा च यंकाममभिकामासिदेवयानिशुचिस्मिते तत्तेहंसम्प्र
दास्यामियदिवापिहिदुर्लभं १५ देवयान्यु च दासींकन्यासहस्त्रेणशर्मिष्ठामभिकामये अनुमांतत्रगच्छेत्सायत्रदद्यात्वमेपिता १६
वृषपर्वा च उत्तिष्ठगच्छधात्रित्वंशर्मिष्ठांशीघ्रमानय यंचकामयतेकामंदेवयानीकरोतुतं १७ वैशंपायनउ च ततोधात्रीतत्रगत्वा
शर्मिष्ठांवाक्यमब्रवीत् उत्तिष्ठभद्रेशर्मिष्ठेज्ञातीनांसुखमावह १८ त्यजतिब्राह्मणःशिष्यान्देवयान्याप्रचोदितः सायंकामयतेकामं
सकार्योद्यत्वयानघे १९ शर्मिष्ठो च यंसाकामयतेकामंकरवाण्यहमद्यतं वंघेवमाकृत्येपेशुक्रोदेवयानीकृतेहिमां मद्दोषान्नागम
च्छुक्रोदेवयानीचमत्कृते २० वैशंपायनउ चः ततःकन्यासहस्त्रेणवृतासाशिविकयानदा पितुर्नियोगात्त्वरितानिश्चक्रामपुरोत्तमा
त् २१ शर्मिष्ठो च अहंदासीसहस्त्रेणदासीतेपरिचारिका अनुत्वांतत्रयास्यामियत्रदास्यतितेपिता २२ ॥ ॥ ॥ ॥

१७ १८ १९ २० २१ २२ २२ २२ २२ २२ २२ २२ २२

२५ विज्ञानंब्रह्मानुभवः विद्यामृतसंजीवनी २६ २७ मायाते अध्यायः अध्यम १ तेनस्वयंवृतेनशर्मिष्ठयास्वीमद्दासीसहस्रोपेतया २ मधुमाधवीमधुरुद्धृतांम

व॰

देवयान्यु च स्तावतोदुहिताहंतेयाचतः प्रतिगृह्णतः स्तूयमानस्यदुहिताकथंदासीभविष्यसि १३ शर्मिष्ठो च येनकेनचिदात्मी
नोंज्ञातीनांसुखंमोहे अतस्त्वामनुयास्यामियत्रदास्यतितेपिता २४ वैशंपायनउ च प्रतिश्रुतेदासभावेदुहित्राद्वृषपर्वणः देवयानीन
पश्रेष्ठपितरंवाक्यमब्रवीत २५ देवयान्यु च प्रविशामिपुरंताततुष्टास्मिद्विजसत्तम अमोघंतवविज्ञानमस्तिविद्याबलंचते २६ वै
शंपायनउ च एवमुक्तोदुहित्रासद्विजश्रेष्ठोमहायशाः प्रविवेशपुरंहृष्टः पूजितः सर्वदानवैः २७ इत्यादिपर्वणियायाते वैशंपा
यनउ च अथदीर्घस्यकालस्यदेवयानीनृपोत्तमः वनंतदेवनिर्याताक्रीडार्थंवरवर्णिनी १ तेनदासीसहस्रेणसार्द्धंशर्मिष्ठया
तदा तमेवदेशंसंप्राप्ताययाकामंचचारसा २ ताभिःसखीभिःसहितासर्वाभिर्मुदिताभृशं क्रीडंत्योभिरताःसर्वाःपिबंत्योमधुमाध
वीं ३ खादंत्योविविधान्भक्ष्यान्विदशंत्यःफलानिच पुनश्चनाहुषोराजामृगलिप्सुर्यदृच्छया ४ तमेवदेशंसंप्राप्तोजलार्थी
श्रमकर्षितः ददृशेदेवयानींसशर्मिष्ठांताश्चयोषितः ५ पिबंतीर्ललमानाश्चदिव्याभरणभूषिताः उपविष्टांचददृशेदेवयानींशु
चिस्मितां ६ रूपेणाप्रतिमांतासांस्त्रीणांमध्येवरांगनां शर्मिष्ठयासेव्यमानांपादसंवाहनादिभिः ययातिरु च द्वाभ्यांकन्यास
हस्राभ्यांद्वेकन्येपरिवारिते गोत्रेचनामनीचैवद्वयोःपृच्छाम्यहंशुभे ८ देवयान्यु च आख्यास्याम्यहमादत्स्ववचनंमेनराधिप शु

अधिके १ क्रोनामासुरगुरुःसुतांजानीहितस्यमां ९

दिरा ३५ पिबंतीयेयंललमानाःक्रीडंतीः ६ ७ द्वाभ्यामिमुक्तांर्यगोत्रेवंशकरवृषी ८ ९ ॥ ॥ ॥ ॥ ॥

११ विधानं दैवं अनुवर्त्तते अनुसरन्नस्मि १२ १३ रागोत्सुकं पंन्नाम्नी वा केनात्र हेतुनयं अयुत कर्मेणाहन्वलेति १४ अर्थेन कार्येणवारितं मीनप माद्दिन्नानुमुक्तोस्मि
पलायितेनजेष्ठ्योतोस्मि १६ १८ संसृष्टं उच्छिन्न स्पर्द्ध त्रस्प ब्राह्मणावीर्यादेवपुनः रुस्त्वात ब्राह्मणो क्षत्रं संसृष्टं क्षत्रियकन्यासु लोपामुद्रादिषु ब्राह्मणानामुत्प

इयं च मे सखी दासी यत्राहं तत्र गामिनी दुहिता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः १० ययातिरु च कथं तु ते सखी दासी कन्ये यं वरव
र्णिनी असुरेन्द्रसुतासुभ्रूः परं कौतूहलं हि मे ११ देवयान्यु च सर्वएव नरश्रेष्ठ विधानमनुवर्त्तते विधानविहितं मत्वा माविचित्राः
कथाः कृथाः १२ राजवद्रूपवेषौ ते ब्राह्मीं वाचं बिभर्षि च को नाम त्वं कुतश्चासि कस्य पुत्रश्च शंस मे १३ ययातिरु च ब्रह्मचर्येण
वेदो मे कृत्स्नः श्रुतिपथं गतः राजाहं राजपुत्रश्च ययातिरिति विश्रुतः १४ देवयान्यु च केनास्यर्थेन नृपते इमं देशमुपागतः जि
घृक्षुर्वारिजं किंचिदथवा मृगलिप्सया १५ ययातिरु च मृगालिप्सुरहं भद्रे पानीयार्थमुपागतः बहुधाप्यनुयुक्तोस्मि तदनुज्ञा
तुमर्हसि १६ देवयान्यु च द्वाभ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह त्वदधीनास्मि भद्रं ते सखा भर्त्ता च मे भव १७ ययातिरु च
विद्ध्यौशनसि भद्रं ते न त्वामर्होस्मि भाविनि अविवाह्या हि राजानो देवयानि पितुस्तव १८ देवयान्यु च संसृष्टं ब्रह्मणां क्षत्रेण ब्रह्म सं
हितं ऋषिश्चाप्यृषिपुत्रश्च नाहुषांग वहस्व मां १९ ८४१

निदर्शनात्क्षत्रेण ब्रह्म संहितं समिश्रं ऋषिः बुधाद्दिलायां पुरूरवास्तत आयुस्ततो नहुषस्ततस्त्वमिति क्षत्रियकन्यायां ब्राह्मणाज्जातो ब्राह्मणः क्षत्रियदारे
षु ब्राह्मणाज्जातः क्षत्रिय एवेत्याह हे पिइलायां क्षत्रियदारत्वाभावाद्युष्माकमृषित्वं भवत्यमितस्पर्धः हे अंग वहस्व परिणयस्व १९ ॥ ॥ ॥ ॥

एकस्येश्वरस्य देहो देहावयवाः मुखबाहूरुपादास्तदुद्भवाः २० प्रागेव त्वया मम पाणिग्रहणं कृतमत इदानीं विचारावसरो नास्तीत्याशयेनाह । पाणीति पाणिधर्मः

ययातिरुवाच एकदेहोद्भवा वर्णाश्चत्वारोपि वरांगने पृथग्धर्माः पृथक्शौचास्तेषां तु ब्राह्मणो वरः २० देवयान्युवाच पाणिधर्मो नाहु
षोयं न पुंभिः सेवितः पुरा तं मे त्वमग्रहीरग्रे वृणोमि त्वामहं ततः २१ कथं नु मे मनस्विन्याः पाणिमन्यः पुमान्स्पृशेत् गृहीतमृषिपु
त्रेणास्वयं वाप्यृषिणा त्वया २२ ययातिरुवाच क्रुद्धादाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् दुराधर्षतरो विप्रो ज्ञेयः पुंसा विजानता २३
देवयान्युवाच कथमाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् दुराधर्षतरो विप्रः कस्मात्ते पुरुषर्षभ २४ ययातिरुवाच एकमाशीविषो
हंति शस्त्रेणैकश्च वध्यते हंति विप्रः सराष्ट्राणि पुराण्यपि हि कोपितः २५ दुराधर्षतरो विप्रस्तस्माद्भीरुमतो मम अतो दत्तां च पित्रा त्वां
भद्रे न विवहाम्यहं २६ देवयान्युवाच दत्तां वहस्व तन्मा त्वं पित्रा राजन्वृतो मया अयाचतो भयं नास्ति दत्तां च प्रतिगृह्णतः २७
वैशंपायन उवाच त्वरितं देवयान्याप्रेषितं पितुरात्मनः सर्वं निवेदयामास धात्री तस्मै यथातथं २८ श्रुत्वैव च स राजानं दर्शया
मास भार्गवः दृष्ट्वैव चागतं शुक्रं ययातिः पृथिवीपतिः ववंदे ब्राह्मणं काव्यं प्रांजलिः प्रणतः स्थितः २९ देवयान्युवाच राजायं
नाहुषस्तात दुर्गमे पाणिमग्रहीत् नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे ३० शुक्र उवाच वृतोनया पतिर्वीर सुतया त्वं ममेष्टया
गृहाण मां मया दत्तां महिषीं नहुषात्मज ३१ ॥

पाणिग्रहणाख्यो धर्मः २१ २२ ययातिरुक्तस्य शर्मिष्ठासक्त्या देवयान्याः स्वकोपे सति शुक्राद्भीतस्सन्मनस्येव उवाच क्रुद्धादिति २३ २४ २५ अदत्ता
मिति छेदः २६ मा मा भयं कृत्रिमेणाब्राह्मणीपाणिग्रहणजदोषजं २७ २९ दुर्गमे संकटे ३० ३१

३२ ईप्सितं वरं वृणीष्वेत्युक्तोपीदानीं न वृत न वा न पश्चात्तु अन्यत्र जरसं क्रान्तरा सामर्थ्यरूपः शुक्रेणो वस्य प्रतिज्ञासिद्धये दत्तः इति ध्येयं ३८ यायाते अध्यायः ७

ययातिरु च अधर्मान्न स्पृशेदेवं महान्मामिह भार्गव वर्णसंकरजो ब्रह्मन्निति त्वां प्रवृणोम्यहं ३३ शुक्र उ च अधर्मात्त्वां विमुंचामि
वृणु त्वं वरमीप्सितं अस्मिन्विवाहे माग्लासीरहं पापं नुदामि ते ३४ वहस्व भार्यां धर्मेण देवयानीं सुमध्यमां तया सह सुखं प्रीतिमतुलां
समवाप्नुहि ३४ इयं चापि कुमारी ते शर्मिष्ठा वार्षपर्वणी संपूज्या सततं राजन्मा चैनां शयने ह्वये ३५ वैशंपायन उ च एवमुक्तो य
यातिस्तु शुक्रं कृत्वा प्रदक्षिणां शास्त्रोक्तविधिना राजा विवाहमकरोच्छुभं ३६ लब्ध्वा शुक्रान्महद्वित्तं देवयानीं तदोत्तमां द्विसहस्रे
ण कन्यानां तथा शर्मिष्ठया सह ३७ संपूजितश्च शुक्रेण दैत्यैश्च नृपसत्तमः जगाम स्वपुरं हृष्टोनुज्ञातोथ महात्मना ३८ इत्यादिपर्व
णि यायाते वैशंपायन उ च ययातिः स्वपुरं प्राप्य महेन्द्रपुरसन्निभं प्रविश्यान्तःपुरं तत्र देवयानीं न्यवेशयत् १ देवयान्याश्चानुमते सुतां
तां वृषपर्वणः अशोकवनिकाभ्यासे गृहं कृत्वा न्यवेशयत् २ वृतां दासीसहस्रेण शर्मिष्ठां वार्षपर्वणीं वासोभिरन्नपानैश्च संविभज्य सु
सत्कृतां ३ देवयान्या तु सहितः स नृपो नहुषात्मजः विजहार बहूनब्दान्देववन्मुदितः सुखी ४ ऋतुकाले तु संप्राप्ते देवयानी वराङ्गना
लेभे गर्भं प्रथमतः कुमारं च व्यजायत ५ गते वर्षसहस्रे तु शर्मिष्ठा वार्षपर्वणी ददर्श यौवनं प्राप्ता ऋतुं सा चान्वचिन्तयत् ६ ऋतुका
लश्च संप्राप्तो न च मेस्ति पतिर्वृतः किं प्राप्तं किं नु कर्तव्यं किं वा कृत्वा कृतं भवेत् ७ देवयानी प्रजातासौ वृथाहं प्राप्तयौवना यथा तया वृतो भ
र्ता तथैवाहं वृणोमि तं ८ राज्ञा पुत्रफलं देयमिति मे निश्चिता मतिः अपीदानीं स धर्मात्मा इयान्मे दर्शनं रहः ९ ॥ ॥ ॥ ॥

पातिरिति १ २ ४ व्यजायत अजनयत् प्रज्ञा रूपेणाविनता वक्लीवत् ८ ९ ॥ ७ ॥ ॥ ॥ ॥ ॥

आ॰ १६५

१० रहितेविजने ११ १२ १३ १४ अवहे[?]ढवान्अहं १५ नर्मयुक्तंपरिहासयुक्तंवचनंअनृतमपिनहिनस्तिदोषजनकंनभवतीत्यर्थः स्त्रीषुगम्यासुअत्र
हेमनोनरमेपेस्तुस्त्रीरनृतापिकृताचत्राहिनस्तिधनेनतुपलकृतादेशिपि १६ स्त्रीघनृतंनहिनस्तिप्रत्युतसन्मारेरागात्त्यागएवहिनस्तीत्याह।एष्टंत्विति।
साहेयएष्टंसदृष्टेः अन्यथाप्रवदंतंपुरुषंपतितंपश्यदंतितन्मिथ्यागोब्राह्मणस्त्रीदीनानाथाघर्षेकूटसाक्ष्यस्यापिपुण्यहेतुत्वात्तथाचहिंसाहेतुःसम्यग

अथनिष्क्रम्यराजासौतस्मिन्कालेयदृच्छया अशोकवनिकाभ्याशेशर्मिष्ठांप्रेक्ष्यधिष्ठितः १० तमेकंरहितेदृष्ट्वाशर्मिष्ठाचा
रुहासिनी प्रत्युद्गम्यांजलिंकृत्वाराजानंवाक्यमब्रवीत् ११ शर्मिष्ठो च सोमस्येंद्रस्यविष्णोर्यमस्यवरुणस्यच तववानाहुष
गृहेकःस्त्रियंद्रष्टुमर्हति १२ रूपाभिजनशीलैर्हित्वंराजन्वेत्थमांसदा सात्वांयाचेप्रसाद्याहमृतुंदेहिनराधिप १३ प
ति वाच वेद्मित्वांशीलसंपन्नांदैत्यकन्यामनिंदितां रूपंचतेनपश्यामिसूच्यग्रमपिनिंदितं १४ अब्रवीदुशनाकाव्यो
देवयानींयदावहं नेयमाह्वयितव्यातेशयनेवार्षपर्वणी १५ शर्मिष्ठो च ननर्मयुक्तंवचनंहिनस्तिनस्त्रीषुराजन्नविवा
हकाले प्राणात्ययेसर्वधनापहारेपंचानृतान्याहुरपातकानि १६ पृष्टंतुसाक्ष्येप्रवदंतमन्यथावदंतिमिथ्यापतितंनरेंद्र
एकार्थतायांतुसमाहितायांमिथ्यावदंतंत्वनृतंहिनस्ति १७ ॥

प्यनृतमेवअहिंसाहेतुरनृतमपिसत्यमेवेतिभावः प्रकृतमाह एकार्थतायांएकप्रयोजनतायांसमाहितायांआवयोस्त्वदाराधनरूपप्रयोजनेनतुल्यत्वेनतिष्ठि
तेसतिदेवयान्येवममभार्यानशर्मिष्ठेतिमिथ्यावदंतंत्वामेवानृतंहिनस्तीत्यर्थः १७

भा॰ १६५

१८ एकार्थतामेव व्याचष्टे समाविति हे राजन् एतौ विवाहौ मतौ बुद्धा वा हठौ समौ तुल्यावेव यद्वैवदेवयान्यां त्वं मनसा वृतस्तद्वदेवमयापीत्यर्थः अतो यस्त्वं सख्याः प
तिः स एव त्वं कारणान्ममापि पतिः एतन्न लोकप्रसिद्ध्या दृढयति समं सह विवाहं सख्या सह वेतरासां विवाहं सिद्धमाहुः द्वयोः प्रदेय द्रव्यत्ववरणीयत्वादेरेकत्वात् अतः
मे मया वृतोसि अतु प्रासि यतः पतिरसि १९ राजा तु भार्यासि मम त्वं दासी नार्हतीति प्रकारांतरेणोत्तरयन्मैव दातुं प्रतिजानीते दातव्यमिति २० अधर्मात्त्वत्रायस्व

ययातिरु च राज्ञाप्रमाणंभूतानांसनश्येतमृषावदन् अर्थकृच्छ्रमपिप्राप्यनमिथ्यांकर्त्तुमुत्सहे १८ शर्मिष्ठो च समावे
तौमतौराजन्पतिःसख्याश्चयःपतिः समंविवाहमित्याहुःसख्यामेसिवृतःपतिः १९ ययातिरु च दातव्यंयाचमानेभ्यइतिमेव्रतमा
हितं त्वंचयाचसिमांकामंब्रूहिकिंकरवाणिते २० शर्मिष्ठो च अधर्मात्पाहिमांराजन्धर्मंचप्रतिपादय त्वत्तोपत्यवतीलोकेचरेयंधर्म
मुत्तमं २१ त्रयएवाधनाराजन्भार्यादासस्तथासुतः यत्तेसमधिगच्छंतियस्यैतेतस्यतद्धनं २२ देवयान्याभुजिष्यास्मिवश्याचतवभा
र्गवी साचाहंचत्वयाराजन्भजनीयेभजस्वमां २३ वैशंपायनउ च एवमुक्तस्तुराजासतथ्यमित्यभिजज्ञिवान् पूजयामासशर्मिष्ठांधर्मं
चप्रत्यपादयत् २४ ससमागम्यशर्मिष्ठांयथाकाममवाप्यच अन्योन्यंचाभिसंपूज्यजग्मतुस्तौयथागतं २५ ॥ ॥ ॥

रागाज्ञाद्यभिचारेण २१ ननु त्वमपि पित्रा दत्तेन धनेन धर्मं चरन्ती गतिं प्राप्नुहि किं संततेरित्याशंक्याह त्रय इति २२ भुजिष्या देवयान्याः शुक्रेण त्वां इच्छंतीति नियोगात् दासी २३
भुजिष्यात्वमस्यास्तथ्यमिति अभिजज्ञिवान् अभितः साकल्येन ज्ञातवान् धर्मं प्रत्युदानेन आर्त्तत्राणं २४ २५ ॥

२६. प्रजज्ञे प्रजनितवती २७ इत्यादिपर्वणि ऽध्यायः श्रुत्वा १० अवभिजग्मुषी ज्ञातवती ८९ ॥ ॥

ति

तस्मिन्स्वलागमे सुभ्रूः शर्मिष्ठा चारुहासिनी लेभे गर्भं प्रथमतस्तस्मात्स्पतिसत्तमात् २६ प्रजज्ञे च ततः काले राजन्राजीवलोचना कुमार
देवगर्भाभं राजीवनिभलोचनं २७ इत्यादिपर्वणि ऽध्याये वैशंपायन उ च श्रुत्वा कुमारं जातं तु देवयानी शुचिस्मिता चिंतयामास
दुःखार्ता शर्मिष्ठां प्रति भारत १ अभिगम्य च शर्मिष्ठां देवयान्यब्रवीदिदं देवयान्यु च किमिदं वृजिनं सुभ्रु कृतं वै कामलुब्धया शर्मि
ष्ठो च ऋषिरभ्यागतः कश्चिद्धर्मात्मा वेदपारगः समया वरदः कामं चिंतो धर्मसंहितं ३ नाहमन्यायतः काममाचरामि शुचिस्मिते
तस्मादृषेर्ममापत्यमिति सत्यं ब्रवीमि ते ४ देवयान्यु च शोभनं भीरु यद्येवमथ स ज्ञायते द्विजः गोत्र च नामाभिजनतो वेत्तुमिच्छामि तं द्विजं
५ शर्मिष्ठो च तपसा तेजसा चैव दीप्यमानं यथा रविं तं दृष्ट्वा मम संप्रष्टुं शक्तिर्नासीच्छुचिस्मिते ६ देवयान्युवाच यद्येतदेवं शर्मि
ष्ठे न मन्युर्विद्यते मम अपत्यं यदि ते लब्धं ज्येष्ठाच्छ्रेष्ठाच्च वै द्विजात् ७ वैशंपायन उ च अन्योन्यमेवमुक्त्वा तु संप्रहस्य च ते मिथः जगाम
भार्गवी वेश्म तथ्यमित्येव जज्ञुषी ८ ययातिर्देवयान्यां तु पुत्रावजनयन्नृपः यदुं च तुर्वसुं चैव शक्रविष्णू इवापरौ ९ तस्मादेव तु
राजर्षेः शर्मिष्ठा वार्षपर्वणी द्रुह्युं चानुं च पूरुं च त्रीन्कुमारानजीजनत् १० ततः काले तु कस्मिंश्चिद्देवयानी शुचिस्मिता ययातिस
हिता राजन्जगाम रहिते वने ११ ददर्श च तदा तत्र कुमारान्देवरूपिणः क्रीडमानान्सुविस्रब्धान्विस्मिता चेदमब्रवीत् १२ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१३ वंशोवःकः तत्रापिसंवर्धते १४ प्रदेशिन्यातर्जन्या १५ राजानंआलिंगितुमितिशेषः नाभ्यनंदत दूरीकृतवानित्यर्थः १६ १७ १८ १९ २० २१ २२

देवयान्यु च कस्यैतेदारकाराजन्देवपुत्रोपमाःशुभाः वर्चसारूपतश्चैवसदृशामेमतास्तव १३ वै या न वाच एवंपृष्ट्वा
तुराजानंकुमारान्पर्यपृच्छत देवयान्यु च किंनामधेयवंशोवःपुत्रकःकश्चवःपिता विब्रूतमेयथातथ्यंश्रोतुमिच्छामितंह्यहं १४
तेदर्शयन्प्रदेशिन्यातमेवनृपसत्तमं शर्मिष्ठांमातरंचैवतथाचख्युश्चदारकाः १५ वैशंपायनउ च इत्युक्त्वासहितास्तेतुराजा
नमुपचक्रमुः नाभ्यनंदततान्राजादेवयान्यास्तदंतिके १६ रुदंतस्तेथशर्मिष्ठामभ्ययुर्बालकास्ततः श्रुत्वातुतेषांबालानांसव्रीड
इवपार्थिवः १७ दृष्ट्वातुतेषांबालानांप्रणयंपार्थिवंप्रति बुध्वाचतत्त्वतोदेवीशर्मिष्ठामिदमब्रवीत् १८ देवयान्यु च मदधीना
सतीकस्मादकार्षीर्विप्रियंमम तमेवासुरधर्मंत्वमास्थितानबिभेषिमे १९ शर्मिष्ठो च यदुक्तमृषिरित्येवतत्सत्यंचारुहासिनि न्या
यतोधर्मतश्चैवचरंतीनबिभेमिते २० यदात्वयावृतोभर्तावृतएवतदामया सखीभर्ताहिधर्मेणभर्ताभवतिशोभने २१ पूज्या
सिममममान्याचज्येष्ठाचब्राह्मणीह्यसि त्वत्तोपिमेपूज्यतमोराजर्षिःकिंनवेत्थतत् २२ वैशंपायनउ च श्रुत्वातस्यास्ततोवाक्यंदे
वयान्यब्रवीदिदं राजन्नाद्येहवत्स्यामिविप्रियंमेकृतंत्वया २३ सहसोत्पतितांश्यामांदृष्ट्वातांसाश्रुलोचनां तूर्णंसकाशंकाव्य
स्यप्रस्थितांव्यथितस्तदा २४ अनुवव्राजसंभ्रांतःपृष्ठतःसांत्वयन्नृपः न्यवर्ततनचैवस्मक्रोधसंरक्तलोचना २५ अविब्रु
वंतीकिंचिच्चराजानंसाश्रुलोचना अचिरादेवसंप्राप्ताकाव्यस्योशनसोंतिकं २६ सातुदृष्ट्वैवपितरमभिवाद्याग्रतःस्थिता
अनंतरंययातिस्तुपूजयामासभार्गवं २७ ॥

२३ २४ २५ २६ ॥ ॥ ॥ ॥ ॥

आः अधरोत्तरं नीचस्याभिवृद्धिरुत्तमस्य ह्रासः अतिवृत्तास्मि राज्ञः सकाशाद्दयततया धिषणेनातिक्रान्ता उल्लंघितास्मि २८ तदेवाह त्रय इति ३० अधर्मेण
९६७ वप्रियं अकृथाः ३१ नान्यचेतसा न कामलोभेन ३२ ३३ न कांचन परिहरेदिति स्मृतनिषेधातिक्रमजस्याधर्मस्य भयात्संविग्नः अनन्यपूर्विकां गम्यां याचमानां

देवयान्यु च अधर्मेणान्वितो धर्मः प्रवृत्तमधरोत्तरं शर्मिष्ठयातिवृत्तास्मि दुहित्रा वृषपर्वणः २८ त्रयोस्यां जनिताः पुत्रा राज्ञानेन ययातिना दुर्भगाया मम द्वौ तु पुत्रौ तात ब्रवीमि ते २९ धर्मज्ञ इति विख्यात एष राजा भृगूद्वह अतिक्रान्तश्च मर्यादां काव्यैतत्कथयामि ते ३० शुक्र उवाच धर्मज्ञः सन्महाराज योधर्ममकृथाः प्रियं तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ३१ ययातिरु च ऋतुं वै याचमानाया भगवन्नान्यचेतसा दुहितुर्दानवेन्द्रस्य धर्म्यमेतत्कृतं मया ३२ ऋतुं वै याचमानाया न ददाति पुमान्वृतः भ्रूणहेत्युच्यते ब्रह्मन्स इह ब्रह्मवादिभिः ३३ अभिकामां स्त्रियं यस्तु गम्यां रहसि याचितः नोपैति स च धर्मेषु भ्रूणहेत्युच्यते बुधैः ३४ इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान् ३५ शुक्र उ च नन्वहं प्रत्यवेक्ष्यस्ते मदधीनोसि पार्थिव मिथ्याचारस्य धर्मेषु चौर्यं भवति नाहुष ३६ वैशंपायन उ च क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषस्तदा पूर्वं वयः परित्यज्य जरां सद्योन्वपद्यत ३७ य ति उ च अतृप्तो यौवनस्याहं देवयान्यां भृगूद्वह प्रसादं कुरु मे ब्रह्मञ्जरेयं न विशेच्च मां ३८ शुक्र उ च नाहं मृषा ब्रवीमि त्वं जरां प्राप्तोसि भूमिप जरां त्वेतां त्वमन्यस्मिन्संक्रामय यदीच्छसि ३९ ॥

कांचन स्त्रियं ऋतुं याचमानां न परिहरेत् अप्रत्याचक्षीतेति स्मृत्यर्थः ३५ प्रत्यवेक्ष्यः अस्मिन्कर्मणि मदाज्ञा पित्वया प्रार्थनीयेति भावः ३६ ३७ ३८ याम: ९६७
३९ ॥ ॥

४० ज्येष्ठस्य राज्यप्रदानं ज्येष्ठायां ४१ ४२ ययातेरध्यायः जरां १ वलीत्वचः संवलनं पलितानि केशरोमाणां शौक्ल्यं पर्यगुः परितः शरीरं गतानि प्राप्तानि यो

ययातिरुवाच राज्यभाक् स भवेद्ब्रह्मन्पुत्रः पुण्यः कीर्तिभाक् तथा यो मे दद्याद्वयः पुत्रस्तद्भवाननुमन्यताम् ४० शुक्र उवाच संक्रामयि
ष्यसि जरां यथेष्टं नहुषात्मज मामनुध्याय भावेन न च पापमवाप्स्यसि ४१ वयो दास्यति ते पुत्रो यः स राजा भविष्यति आयुष्मान्की
र्तिमांश्चैव बह्वपत्यस्तथैव च ४२ इत्यादिपर्वणि ययाते वैशंपायन उवाच जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि पुत्रं ज्येष्ठं व
रिष्ठं च यदुमित्यब्रवीद्वचः १ ययातिरुवाच जरा वली च मां तात पलितानि च पर्यगुः काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने
२ त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह यौवनेन त्वदीयेन चरेयं विषयानहं ३ पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहं दत्त्वा स्वं
प्रतिपत्स्यामि पाप्मानं जरया सह ४ यदुरुवाच जरायां बहवो दोषाः पानभोजनकारिताः तस्माज्जरां न ते राजन्ग्रहीष्य इति मे मतिः
५ सितश्मश्रुशिरा दीनो जरया शिथिलीकृतः वलीसंगतगात्रस्तु दुर्दर्शो दुर्बलः कृशः ६ अशक्तः कार्यकरणे परिभूतः सयौ
वनैः सहोपजीविभिश्चैव तां जरां नाभिकामये ७ सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप जरां ग्रहीतुं धर्मज्ञ तस्मादन्यं वृणीष्व वै ८
ययातिरुवाच यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि तस्माद्राज्यभाक्तात प्रजा ते न भविष्यति ९ तुर्वसो प्रतिपद्यस्व पाप्मानं जरया स
ह यौवनेन चरेयं वै विषयांस्तव पुत्रक १० पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनं स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ११ ॥

वनसाध्ये कामभोगे पाप्मानं भोगासामर्थ्यं पितरि दिष्टाहृ पंचिन्तस्य दौस्थ्यं चरेयं भुंजीय ३ ४ दोषाः कफाद्यविकारा द्यमनाद्याः ५ दोषानेवाह सितेति ६ ॥

आ: १६८

१४ तिर्यग्योनीनामिव गतं प्रकाशमे षुनाघाचरणां येषां तेषु १५ १८ वाक्संगः दंतानां पतनात् कफादिहेतुश्च वाच: संगः इव संगः सन्नत्वं अव्यक्तमिति याव

त् २

तुर्वसु च नकामये ज्जरां तात कामभोगप्रणाशिनीं वलरूपांतकरणीं बुद्धिप्राणप्रणाशिनीं १२ ययातिरुवाच यत्त्वं मे हृदयाज्जातो वयः

स्वं न प्रयच्छसि तस्मात् प्रजा समुच्छेदं तुर्वसो न वयास्यति १३ संकीर्णाचारधर्मेषु प्रतिलोमचरेषु च पिशिताशिषु चांत्येषु मूढ राजा भवि

ष्यसि १४ गुरुदारप्रसक्तेषु तिर्यग्योनिगतेषु च पशुधर्मिषु पापेषु म्लेछेषु त्वं भविष्यति १५ वैशंपायन उवाच एवं स तुर्वसुं शप्त्वा

ययातिः सुतमात्मनः शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् १६ ययातिरुवाच द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीं जरां वर्ष

सहस्रं मे यौवनं स्वं दद स्वच १७ पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनं स्वं चादास्यामि भूयोहं पाप्मानं जरया सह १८ द्रुह्युरुवाच नग

जं न रथं नाश्वं जीर्णो भुंक्ते न च स्त्रियं वाग्भंगश्चास्य भवति तां जरां नाभिकामये १९ ययातिरुवाच यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छ

सि तस्माद्द्रुह्यो प्रियः कामो न ते संपत्स्यते क्वचित् २० यत्राश्वरथमुख्यानामश्वानां स्याद्गतं न च हस्तिनां पीठकानां च गर्दभानां तथैव

२१ वस्तानां च गवां चैव शिविकायास्तथैव च उडुपप्लवसंतारो यत्र नित्यं भविष्यति अराजभोजशब्दं त्वं तत्र प्राप्स्यसि सान्वयः २२

ययातिरुवाच अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह एकं वर्षसहस्रं तु चरेयं यौवनेन ते २३ अनुरुवाच जीर्णः शिशुवदादत्ते कालेन्न

मशुचिर्यथा न जुहोति च कालेग्निं तां जरां नाभिकामये २४ ययातिरुवाच यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि जरादोषस्त्वया प्रोक्त

स्तस्मात्त्वं प्रतिलप्स्यसे २५ ॥

त. १९ २० पीठकानां एज्ययोग्यानां नरयानविशेषाणां नरवनरं वाहतिम्लेछेषु प्रसिद्धानां २१ २४ प्रतिलप्स्यसे प्रजाः ताश्च विनशिष्यंतीति द्वयोः संबंधः [illegible] १५ पाम० १६८

अग्निप्रस्कंदनं श्रौतस्मार्ताग्निसाध्यकर्मत्यागः तत्परः २६ वरीयान् स्वस्मात् ज्येष्ठो महान् जरा देहेंद्रियशक्तिघातः २७ २९ अंजसा आर्जवेन ३० यथो

प्रजास्त्वद्यौवनात्प्राप्ता विनशिष्यंत्यनो नव अग्निप्रस्कंदनपरस्त्वं चाप्येवं भविष्यसि २६ ययातिरु च पूरो त्वं मे प्रियः पुत्रस्त्वं वरीया
न्भविष्यसि जरा वली च मां तात पलितानि च पर्यगुः २७ काव्यस्योशनसः शापान्न च तृप्तोस्मि यौवने पूरो त्वं प्रतिपद्यस्व पाप्मा
नं जरया सह कंचित्कालं चरेयं वै विषयान्वयसा तव २८ पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनं स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया
सह २९ वैशंपायनउ च एवमुक्तः प्रत्युवाच पूरुः पितरमंजसा यथात्थ मां महाराज तत्करिष्यामि ते वचः ३० प्रतिपत्स्यामि ते रा
जन्पाप्मानं जरया सह गृहाण यौवनं मत्तश्चर कामान्यथेप्सितान् ३१ जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव यौवनं भवते दत्वा चरिष्या
मि यथात्थ मां ३२ ययातिरु च पूरो प्रीतोस्मि ते वत्स प्रीतश्चेदं ददामि ते सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ३३ इत्यादिपर्व
णिययाते वैशंपायनउ च पौरवेणाथ वयसा ययातिर्नहुषात्मजः प्रीतियुक्तो नृपश्रेष्ठश्चचार विषयान्प्रियान् १ यथाकामं
यथोत्साहं यथाकालं यथासुखं धर्माविरुद्धं राजेंद्र यथार्हति स एव हि २ देवानतर्पयद्यज्ञैः श्राद्धैस्तद्वत्पितॄनपि दीनाननुग्रहैरिष्टैः
कामैश्च द्विजसत्तमान् ३ अतिथीनन्नपानैश्च विशश्च परिपालनैः आनृशंस्येन शूद्रांश्च दस्यून्संनिग्रहेण च ४ ॥ ॥ ॥

॥ ॥ ॥

श्रितानित्यस्य यावज्जीवमर्पीति भावः ३१ ३२ अध्यायःस्वचारत्वभोज १४ ॥ ॥ ॥ ॥

श्रा
९६९

५ विषयादिव्यगंधाद्युः गोचरेवुशेयस्यसः विषयगोचरः ६ ७ परीतिसौरवर्षैर्हि मत्स्यं पंचदिनानि पंचदशनाड्यः त्रिंशत्पलानि एकत्रिंशदक्षराणि वर्द्धंते सावन
नेषस्याधिकशतत्रयदिनात्मकैर्वर्षैरायुर्गण्यते ततः कलाः काष्ठाश्च अष्टादशनिमेषाः काष्ठा त्रिंशत्काष्ठाः कलाः इत्युक्तरूपाः संख्यायेत्युक्तं ८ ९ अलकायां

धर्मेणाचप्रजाः सर्वा यथावदनुरंजयन् ययातिः पालयामास साक्षादिंद्रइवापरः ५ सराजासिंहविक्रांतो युवाविषयगोचरः अविरो
धेनधर्मस्यचचारसुखमुत्तमं ६ ससंप्राप्यशुभान्कामांस्तृप्तः स्विन्नपार्थिवः कालंवर्षसहस्रांतं संस्मारमनुजाधिपः ७
परिसंख्यायकालज्ञः कलाः काष्ठाश्चवीर्यवान् यौवनंप्राप्यराजर्षिः सहस्रपरिवत्सरान् ८ विश्वाच्यासहितोरेमेव्यभ्राजत्नंद
नेवने अलकायांसकालंतुमेरुशृंगेतथोत्तरे ९ यदासपश्यतेकालंधर्मात्मातंमहीपतिः पूर्णमत्वाततः कालंपूरुंपुत्रमुवाचह १० य
थाकामंयथोत्साहंयथाकालमरिंदम सेविताविषयाः पुत्र यौवनेनमयातव ११ नजातुकामः कामानामुपभोगेन साम्यति हविषाकृ
ष्णवर्त्मेवभूयएवाभिवर्द्धते १२ यत्पृथिव्यांव्रीहियवं हिरण्यंपशवः स्त्रियः एकस्यापिनपर्याप्तं तस्मात्तृष्णांपरित्यजेत् १३ यादुस्त्यजादुर्मति
भिर्यानजीर्यतिजीर्यतः योसौप्राणांतिकोरोगस्तांतृष्णांत्यजतः सुखं १४ पूर्णंवर्षसहस्रंमेविषयासक्तचेतसः तथाप्यनुदिनंतृष्णाममैतेष
भिजायते १५ तस्मादेनामहंत्यक्त्वाब्रह्मण्याधायमानसं निर्द्वंद्वोनिर्ममोभूत्वाचरिष्यामिमृगैः सह १६ ॥

ताविं ४

कुबेरस्यपुर्यांसः कालंकालोपलक्षितेसः कालंकालोपितं प्रसितंपश्यतीत्याशयेनकर्मव्यतिहारेणतु १० ११ एतदेवज्ञात्वायथाकामंयथोत्साहंयथाकालमित्यादि १२ १३ त्र
लज्ञानमेवाप्नोतिकृत्स्नंहितुर्नविषयभोगइत्याशयेनाहतस्मादितिएनां तृष्णां द्वंद्वानिशीतोष्णमानापमान सुखदुःखादीनितद्रहितोनिर्द्वंद्वः द्वंद्वकल्पक
सत्वब्रह्मणिनिधानात् अतएवनिर्ममः । अहंकारस्यैवममतामूलस्यत्यागात् १६ ॥

रामं
९६९

१८ कनीयसं कनीयांसं १९ नमारं देहि त्वं नियोगः आज्ञा २० २४ मामेति अनौरसोपि यः पुत्रवद्वर्तते स एव पुत्रः न तनयः २५ २६ २७ २८ २९ ३० ३१

पूरोः प्रीतोस्मि भद्रं ते गृहाणेदं स्वयौवनं राज्यं चेदं गृहाण त्वं हि मे प्रियकृत्सुतः १७ वैशंपायन उवाच प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा

यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मनः १८ अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसं ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् १९ कथं शुक्र

स्य नप्तारं देवयान्याः सुतं प्रभो ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रयच्छसि २० यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः शर्मिष्ठायाः सुतो द्रुह्युस्ततोनुः पूरु

रेव च २१ कथं ज्येष्ठानतिक्रम्य कनीयान्राज्यमर्हति एतत्संबोधयामस्त्वां धर्मं त्वं प्रतिपालय २२ य ति वाच ब्राह्मणप्रमुखा वर्णाः

सर्वे शृण्वंतु मे वचः ज्येष्ठं प्रति यथा राज्यं न देयं मे कथंचन २३ मम ज्येष्ठेन यदुना नियोगो नानुपालितः प्रतिकूलः पितुर्यश्च न स पुत्रः सतां

मतः २४ मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु २५ यदुनाहमवज्ञातः तथा तुर्वसुनापि च

द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशं २६ पूरुणा तु कृतं वाक्यं मानितं च विशेषतः कनीयान्मम दायादो धृता येन जरा मम २७ मम

कामः स च कृतः पूरुणा मित्ररूपिणा शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयं २८ पुत्रो यस्त्वानुवर्तेत स राजा पृथिवीपतिः भवतोनु

नयाम्येवं पूरू राज्येभिषिच्यतां २९ प्रकृतय ऊचुः यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा सर्वमर्हति कल्याणं कनीयानपि सत्तमः ३०

अर्हः पुरुरिदं राज्यं यः सुतः प्रियकृत्तव वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरं ३१ वैशं पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा अभि

षिंचत्ततः पूरुं राज्ये स्वे सुतमात्मनः ३२

३२ श्रीरामोजयति ॥ ॥ ॥ छ ॥ छ

३३ ३४ कारयितुं कर्तुं ३५ इति नैलकंठीये भारतभावदीपे आदिपर्वणि यायातार्थप्रकाशः एवमिति १ २ ३ ४ ५ ६ ७ ८ ९ १०

दत्वा च पूरवे राज्यं वनवासाय दीक्षितः पुरात्स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ३३ यदोस्तु यादवा जातास्तुर्वसोर्यवनाः स्मृताः द्रु
ह्योः सुतास्तु वै भोजा अनोस्तु म्लेच्छजातयः ३४ पुरोस्तु पौरवो वंशो यत्र जातोसि पार्थिव इदं वर्षसहस्राणि राज्यं कारयितुं वशी ३५
इत्यादिपर्वणि पूर्वयायातं समाप्तं वैशंपायन उ च एवं स नाहुषो राजा ययातिः पुत्रमीप्सितं राज्येभिषिच्य मुदितो वानप्रस्थोभवन्मुनिः
१ उषित्वा च वने वासं ब्राह्मणैः संशितव्रतः फलमूलाशनो दान्तस्ततः स्वर्गमितो गतः २ स गतः स्वर्निवासं तं निवसन्मुदितः सुखी का
लेन नातिमहता पुनः शक्रेण पातितः ३ निपतन्प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलं स्थित आसीदंतरिक्षे स तदेति श्रुतं मया ४
तत एव पुनश्चापि गतः स्वर्गमिति श्रुतं राज्ञा वसुमता सार्धमष्टकेन च वीर्यवान् ५ प्रतर्दनेन शिबिना समेत्य किल संसदि जन म
उ च कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः सर्वमेतदशेषेण श्रोतुमिच्छामि तत्वतः ६ कथ्यमानं त्वया विप्र विप्रर्षिगणसन्निधौ
देवराजसमो ह्यासीद्ययातिः पृथिवीपतिः ७ वर्धनः कुरुवंशस्य विभावसुसमद्युतिः तस्य विस्तीर्णयशसः सत्यकीर्तेर्महात्मनः च
रितं श्रोतुमिच्छामि दिवि चेह च सर्वशः ८ वैशंपायन उ च हंत ते कथयिष्यामि ययातेरुत्तमां गतिम् दिवि चेह च पुण्यार्थां सर्वपा
पप्रणाशिनीं १० ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

१३ शिलोञ्छवृत्तिं उंछः कणशः आदानं कणिशाद्यर्जनं शिलं तत्त्ववनेएवनतुनगरेद्वेत्रेषुवा १४ पंचाग्नयः चत्वारोऽग्नयः पंचमः सूर्यः १६ आवृत्य व्याप्य रोदसी द्यावाभू

मु २

ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसं राज्येऽभिषिच्य मुदितः प्रवव्राज वनं तदा ११ अंत्येषु स विनिक्षिप्य पुत्रान्यदुपुरोगमान् फलमू
लाशनो राजा वने स न्यवसच्चिरं १२ शंसितात्मा जितक्रोधस्तर्पयन्पितृदेवताः अग्नींश्च विधिवज्जुह्वन्वानप्रस्थविधानतः १३ अति
थीन्पूजयामास वन्येन हविषा विभुः शिलोञ्छवृत्तिमास्थाय शेषान्नकृतभोजनः १४ पूर्णां वर्षसहस्रं च एवं वृत्तिरभून्नृपः अ
ब्भक्षः शरदस्त्रिंशदासीन्नियतवाङ्मनाः १५ ततश्च वायुभक्षोऽभूत्संवत्सरमतन्द्रितः तथा पंचाग्निमध्ये च तपस्तेपे स वत्सरं १६ एकपादस्थि
तश्चासीत्षण्मासाननिलाशनः पुण्यकीर्तिस्ततः स्वर्गं जगामावृत्य रोदसी १७ इत्यादिपर्वणि उत्तरयायाते वैशंपायनउ च स्वर्गतः स तु
राजेन्द्रो निवसन्देववेश्मनि पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तथा १ देवलोकं ब्रह्मलोकं संचरन्पुण्यकृद्वशी अवसत्पृथिवीपालो दी
र्घकालमिति श्रुतिः २ स कदाचिन्नृपश्रेष्ठो ययातिः शक्रमागमत् कथान्ते तत्र शक्रेण स पृष्टः पृथिवीपतिः ३ शक्रउ च यदा स पू
रुस्तव रूपेण राजन्जरां गृहीत्वा प्रचचार भूमौ तदा च राज्यं संप्रदायैव तस्मै त्वया किमुक्तः कथयेह सत्यं ४ ययातिरु च गंगायमुनयो
र्मध्ये कृत्स्नोऽयं विषयस्तव मध्ये पृथिव्यास्त्वं राजा भ्रातरोऽन्त्याधिपास्तव ॥

नीऽपृथिव्यामिव स्वर्गेऽपि मुख्योऽभवदित्यर्थः १७ उत्तरयायाते अध्यायः स्वर्गतरइति १७ अंत्याधिपाः प्रान्तदेशाधिपाः ५ ५ ७ ॥ ॥

परपीडां न कुर्यादित्युक्तं नहीनतः ३

आः १७० विद्वत्वाभिमानात् किंच पार्सर्वज्ञत्वं इन्द्रस्य पुत्रो वज्रक्ष्यमित्यविमृश्यानपपातितिराहा अक्रोधन इति वैशिष्ट्यं पूज्यातारतम्यापेक्षमुच्यते समासमाभ्यां विषमसमे पूज्यत इति समयोवि
षमोविषमयोः समां च पूजां प्रयुंजानस्यापायोक्तेपत्वस्मरणात् ६ आक्रुश्यमान इति अस्य आक्रोष्टुः सुकृतं तितिक्षुर्विंदति नन्वाक्रोशी अस्या क्रोशी तु स्वीयमपि सुकृतं नाशय
तीति भावः ७ नारुंतुद इति कायेन ननृशंसवादीति वाचापरमभ्याददीतेति हीनेनाभिचारादिकर्मणा परं शत्रुं न वशीकर्तुमिच्छेदिति मनसापि परपीडां न कुर्यादित्युक्तं अरुः

अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः अमानुषेभ्यो मानुषाश्च प्रधाना विद्वांस्तथैवाविदुषः प्रधानः ६ आक्रु
श्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः आक्रोष्टारं निर्दहति सुकृतं चास्य विंदति ७ नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत य
यास्य वाचा पर उद्विजेत न तां वदेद्रुषतीं पापलोक्यां ८ अरुंतुदं परुषं तीक्ष्णवाचं वाक्कंटकैर्वितुदंतं मनुष्यान् विद्यादलक्ष्मीकतमं जन
नानां मुखे निबद्धां निर्ऋतिं वहंतं ९ सद्भिः पुरस्तादभिपूजितः स्यात्सद्भिस्तथा पृष्ठतो रक्षितः स्यात् सदासतामतिवादांस्तितिक्षेत्सतां वृ
त्तं चाददीतार्यवृत्तः १० वाक्सायका वदनान्निष्पतंति यैराहतः शोचति रात्र्यहानि परस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेषु ११

रुंतंतद्रवं अरुंतंतुदतीति व्यथयतीति कंटकवत्स्यादिति पदार्थः ननृशंसवादी स्यादित्येतत्सार्द्धेन प्रपंचयति ययास्येति रुषंतीं दहंतीं रुषतीमिति पाठे हिंस्रां ८ विद्या
दलक्ष्मीकतममित्यनेन परुषवचसो दर्शनमपि अलक्ष्मीकारत्वात्परिहार्यमित्युक्तं ९ केन हि नु सत्त्वं व्याहन्यते आह सद्भिरिति असतामतिवादान् दुष्टानामतिक्रमवचनानि
तितिक्षेत १० ११ ॥ राम: १७१

नहीदृशमितिद्वाभ्यांस्वनुक्तंसंवननंसंभजनंपरमेश्वरस्याराधनं १२ १३ इतिटीकायांअध्यायः ८६ किमयंपरोपदेशमेवकृतवानुतस्वयमप्यनुष्ठेयकरमेवववक्तीतिपरीक्षितुमिंद्रउवाच॥
सर्वाणीति १ ययातिःस्वोत्कर्षख्यापनेनभवमज्ञानन्यथार्थमेवमन्वाऽहनाहमिति २ अवमंस्थाःसर्वेभ्यःआत्मनअधिकोन्यासदृशःसदृशान्अल्पीयसःहीनान्गादीन्।

नहीदृशंसंवननंत्रिषुलोकेषुविद्यते यथामैत्रीचभूतेषुदानंचमधुराचवाक् १२ तस्मात्सांत्वंसदावाच्यंनवाच्यंपरुषंक्वचित् पूज्यान्संपूजयेद्दद्या
न्नचयाचेत्कदाचन १३ इत्यादिपर्वणिउत्तरयायाते इंद्रउ च सर्वाणिकर्माणिसमाप्यराजन्गृहान्परित्यज्यवनंगतोसितत्वांपृच्छामिनहुषस्यपुत्र
केनासितुल्यस्तपसाययाते १ ययातिरु च नाहंदेवमनुष्येषुनगंधर्वेषुमहर्षिषु आत्मनस्तपसातुल्यंकंचित्पश्यामिवासव २ इंद्रउ च य
दावमंस्थाःसदृशःश्रेयसश्चअल्पीयसश्चाविदितप्रभावः तस्माल्लोकाअंतवंतस्तवेमेक्षीणेपुण्येपतितास्यद्यराजन् ३ ययातिरु च
सुरर्षिगंधर्वनरावमानात्क्षयंगतामेयदिशक्रलोकाः इच्छाम्यहंसुरलोकाद्विहीनःसतांमध्येपतितुंदेवराज ४ इंद्रउ च सतांसकाशेपति
तासिराजंश्च्युतःप्रतिष्ठांयत्रलब्धासिभूयः एतद्विदित्वाचपुनर्ययातेनमावमंस्थाःसदृशःश्रेयसश्च ५ वैशंपायनउ चः ततःप्रहा
यामरराजजुष्टान्पुण्याल्लोकान्पतमानंययातिं संप्रेक्ष्यराजर्षिवरोष्टकस्तमुवाचसद्धर्मविधानगोप्ता ६ ॥ ॥ ॥ ॥

मपिहितकलाहादिस्वरूपैनान्तिर्यञ्चोपिनावमंतव्याःकिमुतसदृशोमनुष्याःश्रेयांसोदेवास्तत्रापश्चेत्यर्थः ३ ४ च्युतःप्रतिष्ठांयत्रलब्धासिभूयइतिइंद्रेणासत्सदस्या
लुत्वंदर्शितंयत्रपतितामतिष्ठांलब्धासित्सप्ति ५ ६

१२ आवपनेसंग्रहे १३ अध्यायः अहं १ खटं हि त्रेपुनस्त्यपोगात्तेषांल्लघोयमितिधीर्मभिद्दिशेतदर्थंआपनीततपोविघागर्वल्लानवयः श्रेसमेवपुनस्त्रस्त्वाह अहं हि पूर्वो

अष्टकउ च कस्त्वं युवा वासवतुल्यरूपः स्वतेजसा दीप्यमानो यथाग्निः पतत्सुदीर्गाविधरांधकारात्वान्तेवरएणो प्रवरो यथार्कः ७ ६
ष्वाचत्वां सूर्यपथात्पतंतं वैश्वानरार्कद्युतिमप्रमेयं किंनुस्विदेतत्पततीति सर्वे वितर्कयंतः परिमोहितास्मः ८ दृष्ट्वाचत्वां विष्ठितं देवमार्गे श
क्रार्कविष्णुप्रतिमप्रभावं अभ्युद्गतास्त्वां वयमद्य सर्वे तत्वं च पाते तव जिज्ञासमानाः ९ नचापि त्वां धृष्णुमः प्रष्टुमग्रे नचत्वमस्मान्पृ
च्छसि ये वयं स्मः तत्वा पृच्छामि स्पृहणीयरूपकस्यत्वं वा किंनिमित्तं त्वमागाः १० भयंतु ते व्येतु विषादमोहौ त्यजाशु चैवेंद्रसमप्रभाव त्वां
वर्तमानं हि सतां सकाशे नालं प्रसोढुं बलहापि शक्रः ११ संतः प्रतिष्ठा हि सुखच्युतानां सतां सदेवामरराजकल्पाः ते संगताः स्थावरजंगमे
शाः प्रतिष्ठितस्त्वं सदृशेषु सत्सु १२ प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः प्रभुः सूर्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः १३ इत्यादिपर्व
णि उत्तरयायाते य ति वाच अहं ययातिर्नहुषस्य पुत्रः पूरोः पिता सर्वभूतावमानात् प्रभ्रंशितः सुरसिद्धर्षिलोकात्परिच्युतः प्रपता
म्यल्पपुण्यः १ अहं हि पूर्वो वयसा भवद्भ्यस्तेनाभिवादं भवतां न प्रयुंजे यो विद्यया तपसा जन्मना वा वृद्धः स पूज्यो भवति द्विजानां २
अष्टकउ च अवादीस्त्वं वयसा यः प्रवृद्धः स वै राजन्नात्यधिकः कथं वै यो विद्यया तपसा संप्रवृद्धः स एव पूज्यो भवति द्विजानां ३ ॥

अवादीरित्येन दूषणपूर्वकं विधानपसोऽसे स्पष्टकेन स्फोतेन त्वात्तुमृत्तं विघ्नं दर्शयन्नपतिरुवाच प्रतिकूलमिति कर्मणां पुराणानां प्रतिकूलं नाशकं पापं गर्वः तत्त्वाप्रवणोन स्व
दर्पवति वर्त्तनेन पापप्लोकां नरकप्रदं एतत्पापं असतां मे वंधिसंतो नानुवर्त्तंतिनानुवर्त्तने इदानीमपि किंच प्राचोपि संतः यथा एषां कर्मणां अनुकूलाउपदं हंहकोः त्वसुतथोतन म२
प्रकारेणा दंभदर्पादिराहित्येन आसन अहं त्वतद्विधन्नात्वगर्हितेणाव्यावितत्प्राशयः ४ अभूत्वनेविपुलंगतेतदिनितन दंभादिराहित्येन प्रसिद्धाधनेपुरोपेमममविपुलंयदभू
ततन्नगतंनष्टंदर्पादिस्पर्षः पुनरिदानीतत्तचेष्टमानोपितत्पुनर्नोधिगंतास्मि एवं प्रधार्यममि कंगतिं ज्ञात्वाधीरोधियमीरयन्धीरोषिणा कामादिनानभितोभवेदित्यर्थः ५

ना२
यथातिरु च प्रतिकूलं कर्मणां पापमाहुस्तद्वर्त्तनेप्रवणेपापप्लोकं संतोऽसतां नानुवर्त्तंति चैतद्यथा वैषामनुकूल्याल्पयासन ४ अभूत्वनं
मेविपुलं गतंतद्धि वेष्ठमानोनोधिगंतास्मि एवं प्रधार्यात्महितेनिविष्टायोवर्त्तेनेसविज्ञानातिधीरः ५ महाधनोमोयजनेसुयत्नैर्यः सर्ववि
घासुविनीतवुद्धिः वेदानधीत्यतपसायोऽरेहे दिवंसमायात्पुरुषोवीतमोहः ६ नजातुहृष्टेन्महताधनेनवेदानधीपीतनहंकृतःस्यात नानाभा
वावहवोजीवलोकेदेवाधीनानष्टचेष्टाधिकाराः तत्तत्प्राप्यननिहन्येतधीरेरदिष्टं वलीयइतिमत्वात्मवुध्या ७ ॥ ॥ ॥

वीतमोहोमानमकुर्वन ६ एतदेवाहनजात्विति धवेनतपसातर्हित्वमेवकुतोहंकारं कृतवानित्यतआहनानेति जीवलोके स्मिन जीवानानेभावाः पृथक्त्वभावाः केचिद्धर्म
रुचयः केचिद्विपरीताः यतो देवाधीनाः अतएवनष्टाहृ यामूतानां चेष्टाउद्योगः अधिकारे योग्यता च येषां ते तथा मूढानां पुरोपपेडितानां पापेच प्रवृत्तिकारं दैवमेव वलवदि
त्यर्थः एवं विद्वानतत्तत्प्राप्यनविहन्यते तत्तत्सुखं दुःखं वा प्राप्य न विहन्येत हर्षविषादाभ्यां आत्मानं न हिंस्यादित्यर्थः ७ ॥ ॥ ॥ ॥ ॥

श्री एतदेव विवृणोति सुखं हीति द्वाभ्यां ८ । ९ भयं जन्तुरेव तु विषादमोहाविति यद्यपि केनोक्तं तत्रोत्तरमाहाभयेइति धातादिष्टं १० अहमिवान्येपि दिष्टाधीना एवेत्याह संस्वेदजा इति।
७३ एतेपि दिष्टन्द्वयेपुराणपापोच्छेदेस्वां प्रकृतिं परं ब्रह्म भजन्तीति प्राप्नुवन्ति। आरोहक्रमेण मोक्षयोग्यं देहं प्राप्येति शेषः। यथा जाबालोपनिषदि अविमुक्ते प्रकृतस्तत्र हि जन्तोः
प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति जन्तुपदेन प्राणिमात्रसाधारणेन संस्वेदजादीनामपि सा द्वाराणस्यां मोक्षाधिकार
ह

सुखं हि जन्तुर्यदि वापि दुःखं दैवाधीनं विंदते नात्मशक्त्या तस्माद्दिष्टं बलवन्मन्यमानो न संज्वरेन्नापि हृष्येत्कथंचित् ८ दुःखैर्न तप्येन्न सुखैः
प्रहृष्येत्समेन वर्त्तेत सदैव धीरः दिष्टं बलीय इति मन्यमानो न संज्वरेन्नापि हृष्येत्कथंचित् ९ भयेन मुह्याम्यष्टकाहं कदाचित्संतापो मे मानसो ना
स्ति कश्चित् धाता यथा मां विदधीत लोके ध्रुवं तथाहं भवितेति मत्वा १० संस्वेदजा अंडजा उद्भिज्जाश्च सरीसृपाः कृमयोप्यप्सु मत्स्याः त
थाश्मानस्तृणकाष्ठं च सर्वं दिष्टक्षये स्वां प्रकृतिं भजन्ति ११

दर्शनात् अथर्वशिरोरामतापनीयमणिकर्णिकायां वा देहे त्वेवा गंगायां वा तीरे पुनरित्युपक्रम्य कृमिकीटादयोप्यत्र मुमुक्षवः संतु न चान्यथेति जन्तुशब्दविवरणाच्च ।
दर्शनात् अथर्वशिरो ... संस्वेदजादीनामपि दिष्टक्षयस्तेन योगपांशोनिं प्राप्येत्याहाहारदोषोप्यपास्तः। अत्राप्याश्वमेधिके संवर्त्तमरुत्तीये तद्दर्शितं। उन्मत्तवेषं विभ्रत्स च चक्र वं १
मीति यथागतं वाराणस्यां महाराज दर्शनेच्छुर्महेश्वरं। तस्या द्वारे समासाद्य न्यस्य पांसुकुणपं क्वचित् तं दृष्ट्वा यो निवर्त्तेत स संवर्त्तो महीपते इति कुणपदर्शनेन महेश्वरदर्श राम०
न सिद्धिः स च यतनावाक्जातेन ११ ७३

अहंतु दिष्टं हृयाभावान्नाप्रेपिदुःखेनते पेरुष्याह। अनित्यतामिति १२ मातामहमितिा तत्रस्थिता अतरिक्षेस्थितं १३ तानितिा क्षेत्रस्य वता क्षेत्रं महाभूतादि धृसंतंतज्ज्ञानंतो ना

अनित्यतांसुखदुःखस्यबुध्वाकस्मात्संतापमष्टकाहंभजेयं किंकुर्यांकिंचकृत्वानतप्येतस्मात्संतापंवर्जयाम्यप्रमत्तः १२ वैशंपायन उवाच
एवंब्रुवाणांनृपतिंययातिमथाष्टकःपुनरेवान्वपृच्छत मातामहंसर्वगुणोपपन्नंतत्रस्थितंस्वर्गलोकेयथावत १३ अष्टक उवाच येयेलो
काःपार्थिवेंद्रप्रधानास्त्वयाभुक्तायंचकालंयथावत तन्मेराजन्ब्रूहिसर्वान्यथावत्क्षेत्रज्ञवत्भाषसेत्वंहिधर्मान् १४ य तिरुवाच ए
जाहमासमिहसार्वभौमस्ततोलोकान्महतश्चाजयंवै तत्रावसंवर्षसहस्रमात्रंततोलोकंपरमस्म्यभ्युपेतः १५ ततःपुरीपुरुहूतस्यरम्यां
सहस्रद्वारांशतयोजनायतां अध्यावसंवर्षसहस्रमात्रंततोलोकंपरस्म्यभ्युपेतः १६ ततोदिव्यमजरंप्राप्यलोकंप्रजापतेर्लोकपतेर्दुरा
पं तत्रावसंवर्षसहस्रमात्रंततोलोकंपरमस्म्यभ्युपेतः १७ सदेवदेवस्यनिवेशनेचविहृत्यलोकानवसंयथेष्टं संपूज्यमानास्त्रिदशैः
समस्तैस्तुल्यप्रभावद्युतिरीश्वराणां १८ तथावसंनंदनेकामरूपीसंवत्सराणांनामयुतंशतानां सहाप्सरोभिर्विहरन्पुण्यगंधान्पश्यन्नगा
न्पुष्पितांश्चारुरूपान् १९ तत्रस्थितंमांदेवसुखेषुसक्तंकालेतीतेमहतितत्तोतिमात्रं दूतोदेवानामब्रवीदुग्ररूपोध्वंसेत्युच्चैःस्त्रिःप्लुते
नस्वरेण २० एतावन्मेविदितंराजसिंहततोभ्रष्टोहंनंदनात्क्षीणपुण्यः वाचोश्रौषंचांतरिक्षेसुराणांसानुक्रोशाःशोचतांमांनरेंद्र २१
अहोकष्टंक्षीणपुण्योययातिःपतत्यसौपुण्यकृत्पुण्यकीर्तिः तानब्रुवंपतमानस्ततोहंसतांमध्येनिपतेयंकथंनु २२ ॥ ॥ ॥

१२१२य क्षेत्रज्ञास्त्वत्त १४ १५ १६ १७ १८ १९ २० २१ २२ ॥॥ ॥ ॥

नैरितिदैशिकं उपदेशरां धूम्रएवापांगः वस्तु च कोपस्तं धूम्रयांगं प्रतीतः दूहः २३ अध्यायः यदा कार्तयुगप्रधानकृतयुगेभवाः कार्तयुगाः। अत्र तं जनिष्याद्यालेषां मुख्येनम इत्यर्थः
१२ अष्टक उ च तस्मिन्निति मिमव अयानसो मम मता अ मे मेति कर्मफलस्य निमत्वे अकृतवतः। अत्र पापविषये मनः संमुह्यत इत्येकः प्रश्नः न च पुनरेव तत्र नेति प्रजाप
तिलोकाद्दनाहृत्तिः कृतानवयानुमज्ञापतेर्लोकपते दुरापमितितत्राव संवर्षसहस्रमात्रमिति च ततोपि स्वस्याहृत्तिरुद्दिता तत्रकस्य प्रजापतेः किंधामाविशिष्टात्र नाहृत्तिमोग्या

नैरण्यानाभवनां मत्तभूमिः समीहृच्चे मां वरितमुपागतोस्मि हविर्गंधं देशिकं पञ्चभूमेधूम्रापांगं प्रतिगृह्य प्रतीतः २३ इत्यादिपर्व
रिा उत्तरं पायाति अष्टक उवाच यदावसो नंदने कामरूपी संवत्सराणामयुतं शतानां किंकारणं कार्तयुगप्रधाना हित्वा च तं वसुधामन्वप
घः ययातिरु च ज्ञातिः सुहृत्स्वजनो वा यएषेह क्षीणो विनश्यते मानवैर्हि तथा तत्र क्षीणपुण्यं मनुष्यं त्यजंति सद्यः सेश्वरा देवसंघाः
२ अष्टक उवाच तस्मिन्कथं क्षीणपुण्याभवंति समुह्यते मेत्र मनोतिमात्रं किंविशिष्टाः कस्य धामोपयांति तद्वै ब्रूहि क्षेत्रवित्त्वं मतो मे ३
ययातिरु च इमं भौमं नरकं ते पतंति लालप्यमाना नरदेवसर्वे ते कंकगोमायुबलाशनार्थं क्षीणा विवृद्धिं बहुधा व्रजंति ४ ॥ ॥

उपयंतीत्यन्यः प्रश्नः तत्राघसोत्तरं मूयस्क किं एष्ठसि राजसिंहे संततो शेषं ग्रंथो द्वितीयस्येति विभागः ३ इमं भौममिति भूमिरेव भौमो नरकः आध्यात्मादिताप त्रयवत्त्वांत्त
पतेति प्राप्नुवंति प्राप्नुवंति इमं प्राप्ताः श्नुते बहुधा पुत्रपौत्रादिरूपेण विविधवासनामूलेन विवृद्धिं विषमो वृद्धिं लभंते। बहुप्रजानि अतिमाविवेशेति श्रुतेः कालपाशमेव
दृढयंतीत्यर्थः। ते केपि कंके तिगृध्रादेरुपलक्षणं गोमायुरिति शृगालेः तेषां बलं संघः तस्याशनेभक्ष्यशरीरं तस्यार्थं क्षीणाः द्विधेन भौमेन वा देहेन भोगान्भोक्तुं कृतत्रमाः इ
त्यर्थः ४ ॥ ॥

तस्मादेतत्काम्यंकर्मदुष्टंनिषिद्धंगर्हणीयंत्राभिचारिकंचवर्ज्जनीयं ५ ननुक्तंकाद्भिभक्षितस्यकथंस्वरूपसत्ताकर्मवाशरीरांतरेणाविर्भावइतिदेहान्तरवादमाश्रित्यशंकते।भो
भोनरकस्त्वकइतिपृच्छतिचायदानुत्तानिति ६ उत्तरमाह।ऊर्द्ध्वमिति।नदेहनाशोनात्मनाशात्कृतहानादिप्रसंगात्किंतुयोनिमन्येप्रपद्यंतेशरीरत्वायदेहिनःस्थाणुमन्येनुसंयंतिय
थाकर्मयथाश्रुतमितिश्रुतेर्निमित्तभूतेचकर्मणामातुरुदरेजृंभमाणंदेहंप्राप्यनिर्गमादूर्ध्वव्यक्तंसर्वलोकप्रसिद्धेयथास्यात्तथापृथिव्यांसंचरंतितदेवसंचरणंभोभोनरकः कुतोस्य

तस्मादेतद्वर्ज्जनीयंनरेंद्रदुष्टंलोकेगर्हणीयंचकर्म आख्यातंतेपार्थिवसर्वमेवभूयश्चेदानींवदकिंतेवदामि ५ अष्टकउ च यदातुतान्वितुदं
तेवयांसितथागृध्राः शितिकंठाःपतंगाःकथंभवंतिकथमाभवंतिनभौममन्यंनरकंशृणोमि ६ ययातिरु च ऊर्द्ध्वंदेहात्कर्मणोजृंभमाणा
द्व्यक्तंपृथिव्यामनुसंचरंति इमंभौमंनरकंतेपतंतिनावेक्षंतेवर्षपूगाननेकान् ७ षष्टिंसहस्राणिपतंतिव्योम्नितथाअशीतिंपरिवत्सराणि
तान्वैतुदंतिप्रपतंतःप्रपातेभीमाभौमाराक्षसास्तीक्ष्णदंष्ट्राः ८

नरकत्वमत आहनावेक्षंतेवर्षपूगाननेकान्यस्मादत्रपतिताःगतंवयोनबुध्यंतेकर्मभूमिंप्राप्यापिस्वहितापन्नयत्नंनतन्वंतिसोयंप्रदेशोलोकोनरकएवेत्यर्थः एतेनकंका
दिभक्षितस्यापिसत्वंदेहयोगश्चास्तीत्युक्तं ७ स्वर्गतस्यापिपुनःपातावश्यंभावादयंलोकोदुःपरिहरइत्याह।षष्टिंसहस्राणीतिषष्टिंसहस्राणिअशीतिंचसहस्राणिप
रिवत्सराणिव्योम्निस्वर्गेस्थित्वापतंतीतियोजनारक्षरक्षेतिवदंतोदारयंतोभौमाराक्षसाः ८ ॥

आ०
१७५

स्वर्गच्युतिप्रकारं पृच्छति। यदेतेन सम्प्रपतनलक्षणं इति पतनं यानेनेन सह पापाद्येतोः पतनः स्वर्गात् च्यवमाना नानेनतोः एकादशः लक्षणं इति ते पुरुषाः कथं भवंति प्रयातमस्य ह्याह्वकथं नशीर्षित कथं वा आभवंति। इन्द्रियादिमन्तो भवंति कथं वा गर्भत्वं प्राप्नुवंतीति प्रश्नत्रयं ९ तत्रयावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तंते यथेतमाकाशमाकाशाद्वायुं भूत्वा धूमो भव तिधूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति [redacted] मेघो भूत्वा प्रवर्षति तत इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायंते इति श्रुत्यनुसारेणोत्तरं। अस्येति।

अष्टकउ च यदेतेन सम्प्रपतनलक्षणं इति भीमा भीमाः एकादशालीक्षाः दंष्ट्राः कथं भवंति कथमाभवंति कथं भूता गर्भभूता भवंति ९ पपातिरु च अस्त्रैः पुष्पफलानुपृक्तमनेरिति तेद्वपुरुषेणासृष्टं सर्वेनसां ज्ञा आपद्यते वैसगर्भभूतः समुपैति तत्र १० ॥

अस्तशरोदुःखाम्भवाबीसन आपः पुरुषवचसो भवंतीति श्रुतेः देहांतकेषु बहुलेषु भूतसूक्ष्मेषु वर्त्तितो स्वर्गात्तर्वे च्यवमानस्य दुःखोज्ज्वलमयं शरीरं भवतीति युज्यते चात त्रास्त्रमेवरेतो देहबीजं पुष्पफलस्थानीयेन चरणेनकर्मशेषेणानुपृक्तं रमणीयचरणा योनिमापद्यंत इति श्रुतेः अन्वीत अनुसरंति जीवः तज्जलानुगं अस्त्रं पुरुषेणारेतः सिक्तं वा सृष्टं संसृष्टं भवति सभूतः तस्मात् ततो जीवो रेतोभावं प्राप्तः सन् तस्याः स्त्रियः रेतः गर्भं प्रविशति आपद्यते प्राप्नोति। ततो भगभूतो भवति १० ॥ ॥ ॥ ॥ ॥ ॥ रामा०
१७५

कथमत्रांतरेतः सिचा संसृज्यतेतत्राह। वनस्पतीनोषधीश्चाविशंति ओषधिषु संसृष्टमत्रांतरज्ञमिसंसृज्यतइत्यर्थः। ओषधिसंसर्गोप्यत्रसमरणेपियवंवुवायुंतरिन्द्रक्रमेणोदृष्टतप्रकृतेरित्यर्थः
अपोवायुंपृथिवीमंतरिक्षमित्यत्रपृथिवीअपः पूर्ववोध्यावायुधातुनोर्मध्येधूमाग्निमेघाअपिवोध्याउदाहृतप्रकृतेरिवा। एवमोषधिभूताःसंतः द्विपदंमनुष्यशकुंतादिचतुष्पदंप
श्वादिचाविश्यपोतिशेषः।ततोगर्भभूताभवंति ११ एवंपरेतनसंपातशतिदोकेनकृतसमुद्रपस्त उत्तरमुक्तंतेनैवस्थूलदेहादिवेचितजीवंसृष्ट्वादयिविवेक्तुंप्र

वनस्पतीनोषधीश्चाविशंति आपोवायुंपृथिवींचांतरिक्षं चतुष्पदंद्विपदंचापिसर्वमेवंभूतागर्भभूताभवंति ११ अन्यकउ च
अन्यद्वपुर्विदधातीहगर्भमुताहोस्वित्स्वेनकायेनयाति आपद्यमानोनरयोनिमेतामाचक्ष्वमेसंशयात्प्रब्रवीमि १२ शरीरभे
दादिसमुच्छ्रयंचचक्षुः श्रोत्रेलभतेकेनसंज्ञां एतत्सर्वमाचक्ष्वपृष्टः क्षेत्रज्ञत्वांतातमन्यामसर्वं १३ ॥ ॥

भवतीत्यर्थः। अन्यद्वपुरितिनरयोनिमापद्यमानोजीवःस्वेनकायेनतेनैवस्वरूपेणागर्भमानुष्यंयाति। उतत्तत्प्रवेष्टुंअन्यद्वपुरुपाधिभूतंविदधाति। १२ शरीरेति। अन्यजन्मा
नंगीकारेशरीरविशेषकरणानिसंज्ञावनापंलभेतमलपिंडवत्अंगीकारेचस्वाभाविकत्वात्तदुपाधिसंतत्यविच्छेदात्तस्यसंसारित्वंस्यात् १३ ॥ ॥ ॥ ॥

तदेतं दर्शयेति कोपाधिस्त्रीकारेण परिहरति। वायुः समुत्कर्षतीति वायुर्व्याप्तिलिंगं वायुर्देगो हनन त्वं वायुरेव व्याप्तिवायुः समष्टिरिति श्रुतिर्भ्यांपंच प्राणमनोबुद्धिदशेंद्रियसमन्वितो अपंचीकृतभू
तोत्थं सूक्ष्मांगं भोगसाधनमिति श्रुक्ररूपं तत्कर्तृ गर्भ योनिगर्भस्थानं मुख्यकर्मभूतं आतो स्त्रीरजसितेः पूर्वोक्तं पुष्परसेन पुष्पं कर्मफलोत्पादकत्वसाम्यात् तत्रूपरसोऽपूर्वेण नानुरक्तं गौणकर्म
समुत्कर्षति। अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाइतिस्मृतेः पंचमाहुत्या वापः पुरुषवचसो भवंतीति श्रुतेश्च सोमादयपय आदिरूपाः क
र्मसमवायिनी देहोत्पत्तौ रंभिका अपौरेतोरूपाः गृहीत्वा लिंगोपाधिजीवो गर्भाशयं विशतीत्यर्थः अन्यथा आत्मनो निष्क्रमणपरितःपूर्णत्वसंभवेत्। नाप्यंतरीनवत्वसवायुः तत्र गर्भाशयेतत्रा
गां सद्भावत्तानिते उपादानभूतेः कृतश्राधिकारेण यावदपवर्गमवस्थानं यस्य सः तन्मात्रकृताधिकारः एवंभूतो वायुः क्रमेण गर्भं वर्द्धयतीति यथा श्रुतेरुक्ता। शुक्राधिक्ये पुमान् भवति

यथाग्निरु च वायुः समुत्कर्षति गर्भयोनिमुत्तोरेतः पुष्परसानुरक्तं सतत्रतन्मात्रकृताधिकारः क्रमेण
संवर्द्धयतीह गर्भं ७७ ॥

शोणितातिरेके स्त्री भवति द्वाभ्यां समेन नपुंसको ... नो भवति शुक्रं शोणितं नयमो भवति। एकरात्रोषितं फलं भवति पंचरात्रेण बुद्बुदः सप्तरात्रात्पेशी ... सप्तरात्रादर्बुदः पंचविंशतिरा
त्रः स्वस्थितो घनो भवति मासमात्रात्कठिनो भवति द्विमासाभ्यंतरे शिरः संपद्यते मासत्रयेणाग्रीवा व्यादेशो मासचतुष्टयेन त्वग्व्यादेशः पंचमे मासे नखरोमव्यादेशः षष्ठे मुखनासिका।
क्षिश्रोत्रं च संभवति सप्तमे चलनसमर्थो भवत्यष्टमे बुद्ध्याध्यवस्यति नवमे सर्वांगसंपूर्णो भवति स्मृत्वा हं पुनर्जातो जातस्त्वाहं पुनर्मृतः तस्मादिज्ञातस्तु वायुनास्पृष्टो न स्मरति
तज्जन्मजीवमरणमंते च शुभाशुभं कर्म विंदंते नरं नयेन ७७ ॥ ॥ ॥

सेतिसगर्भेज्जायमानोवर्द्धमानः विगृहीततन्मात्रः विग्रहेणसर्वांगकपालोपेनसंपन्नमात्रः संज्ञाप्राग्भवीयांवासनामधिष्ठायानुसंधापनतोजातः सन्योनेर्वहिर्निःसरणानंतरमनु
ष्योहमित्यभिमानवान्भवति। एवंभूतस्यमातामभृतोजीवस्यप्राणाख्यंलिंगंशरीरंस्थूलेउपहितंउपाधिंविद्धिस्वतस्तुमहात्मनः विभोः किंतदुपहितंयेनश्रोत्रादिरूपेणशब्दादीन्वि
षयान्जानातीतिद्वयोःश्लोकयोरन्वयः १५ १६ तन्मात्रकृताधिकारइतिलिंगस्यायावन्मोक्षस्यापित्वमुक्तंतदाक्षिपति। यः संस्थितोमृतः स्थूलदेहदाहेनैवलिंगदे

सजायमानोविगृहीतमात्रः संज्ञामधिष्ठायततोमनुष्यः सश्रोत्राभ्यांवेदयतीहशब्दंसवैरूपंपश्यतिचक्षुषाच १५ घ्राणेनगंधं
जिह्वयाचोरसंचत्वचास्पर्शंमनसावेदभावं इत्यष्टकेहोपहितंहिविद्धिमहात्मनः प्राणभृतांशरीरे १६ अष्टकउवाच
यः संस्थितः पुरुषोदह्यतेवानिखन्यतेवापिनिकृष्यतेवा अभावभूतः सविनाशमेत्यकेनात्मनाचेतयतेपरस्तात् १७ यया
तिरुवाच हित्वासोऽसून्सुप्तवन्निष्टनित्वापुरोधायसुकृतंवा अथांप्येयोनिंपवनाग्रानुसारीहित्वादेहंभजतेराजसिंह १८ ॥

दुःकृतं १

हदाहः कुतोनभवतीत्यर्थः १७ स्वप्नः अदेहांतरप्राप्तौसत्यांनायंदोषः संभवतीत्याह। हित्वासोसून्सुप्तवन्निष्टनित्वासः संस्थितः असून्प्राणान्हित्वाधारयित्वा
गृहीत्वेत्यर्थः धात्रः स्वाप्नप्रत्ययेपरेदधातेर्हिरितिहिभावः तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणं चानूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्यसुसहितत्वसेवलोकांतरप्रा
प्तिश्रुतेः निष्टनित्वाशब्दंकृत्वासुप्तवत्स्वप्नवदन्यांयोनिंदेहंभजते। हित्वात्यक्त्वादेहंस्थूलं १८ ॥ ॥ ॥ ॥ ॥ ७ ७॥

पा३

श्री· १७७ पुरोधाय सुकृतं दुष्कृतं वेत्युक्तं तद्विभजते। पुण्यां योनिमिति। आरोहे अनयत्र वृत्तं कल्याणतरं रूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेति श्रुतेः पित्राद्य
न्यतमां योनिं अवरोहे तु रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वेति। पुण्यां योनिं भजंति। एवं यो यामपि पापकृत्तो नारकी
योनिं भुक्त्वा कपूयचरणाः कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चांडालयोनिं वेति श्रुतेः पापां योनिं भजंति कीटाः पतंगाश्च भवंति पापाः पैकस्वभावाः अथैतन
योः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुतेः कीटादियोनिं असकृद्भजंति अत एव योनिसंचारस्य दुः

पुण्यां योनिं पुण्यकृतो व्रजंति पापां योनिं पापकृतो व्रजंति कीटाः पतंगाश्च भवंति पापा न मे विवक्षास्ति महानुभाव १९
चतुष्पदा द्विपदाः षट्पदाश्च तथा भूता गर्भभूता भवंति आख्याहि मे तदखिलेन सर्वं भूयस्तु किं पृच्छसि एतदिह २०
अष्टकउ च किं स्वित्कृत्वा लभते तात लोकान्मर्त्यः श्रेष्ठांस्तपसा विद्यया वा। तन्मे पृष्टः शंस सर्वं यथावच्छुभाँल्लोकान्ये
न गच्छेत्क्रमेण २१ ॥ ॥ ॥

स्ववक्तव्यत्वात्। न मे विवक्षास्ति महानुभाव आज्ञापयामेसा रूपप्रज्ञायेय वितं मेसाद्य कर्म कुर्वीयेति श्रूयमाणा ज्ञापादिमा एवोत्तुमिच्छामम नास्ति किं तु भूमिं प्राप्यनैष्कर्म्य
मेव साधयिष्यामीति भावः १९ २० एवं स्थूलात्सूक्ष्माच्च देहाद्विवेचितस्य देहिनः उत्क्रांतेर्वेधा दुःक्रांतिः गत्यागत्योः दर्शिता आगतेश्च न मे विवक्षास्तीति तु पृष्टं त्वं चोक्त
मत्तु पृष्टं त्वं चोक्तस्थानप्रापकमुपायं पृच्छति। किं स्विदिति श्रेष्ठान् आवृत्तिशून्यान् तपसा कर्मणा विद्यया उपासनया वा २१ ॥ ॥ ॥ ॥

राम· १७७

उत्तरमाह सार्द्धेन तपश्च दानं चेति नश्यंति मानेन तमोभिभूताः पुंस इति तपः आद्यः सप्त स्वर्गस्य द्वाराणि ता अपि पुंसः पुरुषस्य मानेन अहमेव श्रेष्ठः कर्त्तेत्यभिमानेन नश्यंति य
तस्तेन तमोभिभूताः मानरूपेण तमसाऽभिभूता वशीकृताः २२ दर्पं वर्णयन् अध्ययनादीनां मोक्षोपयोगिनामपि स्वर्गदत्वमुत्तमयावहमित्याह द्वाभ्यां अधीयान इति २३ ॥

ययातिरुवाच तपश्च दानं च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकंपा स्वर्गस्य लोकस्य वदंति संतो द्वाराणि सप्तैव महांति पुंसां न
श्यंति मानेन तमोभिभूताः पुंसः सदैवेति वदंति संतः २२ अधीयानः पंडितं मन्यमानो यो विद्यया हंति यशः परेषां तस्यांतवंत
श्च भवंति लोका न चास्य तद्ब्रह्म फलं ददाति २३ चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छंत्ययथाकृतानि मानाग्निहोत्रमुत
मानमौनं मानेनाधीतमुत मानयज्ञः २४ न मानमान्यो मुदमाददीत न संतापं प्राप्नुयाच्चावमानात् संतः सतः पूजयंतीह लोके
नासाधवः साधुबुद्धिं लभंते २५ इति दद्यामिति यजेहमधीय इति व्रतं इत्येतान्यभयान्याहुस्तानि वर्ज्यानि सर्वशः २६ ॥ ॥

चत्वारीत्यत्र अधीतं ब्रह्मचारिणो धर्मो मौनं यतेः यज्ञाग्निहोत्रे इतरयोर्द्वयोरपि साधारणे २४ अतो मानापमानादिद्वंद्वसहिष्णुर्भवेदित्याह न मानमान्य इति इति दद्यामिति
दांभिकस्य स्वधर्मप्रकाशनाभिनयः । अनत्यय आदिर्द्वय वर्जितं चेन्मोक्षद्वारं नान्यथेत्यर्थः २५ २६ ॥ ॥ ॥ ॥ ॥ ॥

तपसा विषयाविनितनये विषयोः कतरदा वह्निस्मृत्यस्यानं प्रापकमिति पृष्टे तपसस्तत्रारादुपकारकत्वमुक्त्वा विद्यायाः साक्षाद्देवतत्प्रापकत्वमाह ये चेति मनीषिणो मनोनिग्रहशी
लस्य प्रज्ञावन्तः आश्रयं स्वाध्यासाधिष्ठानं पुराणं पुरापि नवं कूटस्थं कार्यकारणावधिकारि न भवतीत्यर्थः मानसस्य मार्गैः प्रणवरूपायतनेन रुद्धमावृतं यद्ब्रह्म ये विद्वांसो वेदयन्ते विदन्ति
स्वार्थे णिच् तमेवैकं ज्ञानीय आत्मानं न वेद वेदीर्महती विनष्टिः निष्कलं निष्क्रियं शान्तमित्यागमेनानुभवाभ्यां च जानंति। तद्ब्रह्म वः युष्माकं श्रेयः यस्मात्तेन ब्रह्मणा संयोगमे

ये चाश्रयं वेदयन्ते पुराणं मनीषिणो मानसमार्गरुद्धं तद्वः श्रेयस्तेन संयोगमेत्य परां शांतिं प्राप्नुयुः प्रेत्य चेह १७ इत्यादिपर्वणि उत्तरयायाते अष्टक
उवाच चरन् गृहस्थः कथमेति धर्मान् कथं भिक्षुः कथमाचार्यकर्मी वानप्रस्थः सत्पथे संनिविष्टो बहून्यस्मिन् संप्रति वेदयन्ति १ ययातिरु च आहूता
ध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमं चोपशायी मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी २ धर्मागतं प्राप्य धनं यजेत दद्या
त्सदैवातिथीन्भोजयेच्च अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषत्पुराणी ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्य ऐक्यं प्राप्य परां शांतिं कैवल्यं प्राप्नुयुस्ते इह जीवन्त एव देहे प्रेत्य देहाभिमानाद्व्युत्थाय तथा च श्रुतिः शरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति १७
अध्यायः। चरन्निति। अस्मिन्सद्धर्मे विषये बहूनि प्राप्तिद्वाराणि वदयन्ति वैदिकाः १ चत्वारि कर्माणि अभयंकराणीत्याश्रमकर्मणामभयंकरत्वमुक्तं तदेव विस्तरेणाह। आहू
ताध्यायीत्यादिना २ ·

४ अनोकशायी शून्यागारदेवालयकन्दरशालादौ गृहस्यागारभिन्नस्थानेशयीत ओक इति सलोप आर्षः लघुः परिग्रहशून्यः ५ यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रु
त्युक्तं परिग्रहत्यागकालमाह रात्रिमिति लोकान्त इति लोकाशब्दाद्या विषयाः ये ये वरत्र्यायदेवत्र अभिजिताल्लब्धीकृताः सुखाः सुखावहा अपि कामा अभिजिता वशवर्त्तिनोपि ता
नेव रात्रिं तदैव सर्वपरिग्रहं सन्न्यासारण्यसंस्थः अश्वयदरराणायनमित्या चक्षते ब्रह्म च यमेव तदरश्चह वैराणश्चारी वौ ब्रह्मलोके त्रतीयस्यामितो दिवीति श्रुतिप्रसिद्धं

स्ववीर्यजीवी वृजिनान्निवृत्तो दाता परेभ्यो न परोपतापी तादृङ्मुनिः सिद्धिमुपैति मुख्यां वसन्नरण्ये नियताहारचेष्टः ४ अशिल्पजी
वी गुणवांश्चैव नित्यं जितेन्द्रियः सर्वतो विप्रमुक्तः अनोकशायी लघुरल्पप्रचारश्चरन्देशानेकचरः स भिक्षुः ५ रात्र्याययावाभिजिता
श्च लोका भवन्ति कामा अभिजिताः सुखाश्च तामेव रात्रिं प्रयतेत विद्वानरण्यसंस्थो भवितुं यतात्मा ६ दशैव पूर्वान्दश चापरांश्च ज्ञाती
न्यथात्मानमथैकविंशं अरण्यवासी सुकृते दधाति विमुच्यारण्ये स्वशरीरधातून् ७ अष्टकउ च कतिस्विदेव मुनयः कति मौना
नि चाप्युत भवन्तीति तदाचक्ष्व श्रोतुमिच्छामहे वयं ८ ॥

ब्रह्मनिष्ठां कर्तुं यतेतेत्यर्थः ६ अरण्यवासी हार्दब्रह्मनिष्ठः तत्रैव हार्दे शरीरधातून्स्थूलसूक्ष्मभूतरूपान्विमुच्य प्रविलाप्य तमपि हार्दं सुकृते निष्कले ब्रह्म
णि तस्मात्तत्सुकृतमुच्यत इति श्रुतिप्रसिद्धे चिदेकरसे दधाति प्रविलापयति ७ सर्वेषामाश्रमेषु सिद्धिरस्तीत्युक्ते अरण्यापद्यते सन्न्यासे चात्यादरो दर्शितस्तत्किं
तत्रैव मोक्षोस्तु नान्यत्रेति संशयानः पृच्छति कतीति मुनयो मौनाः मौनानि मोक्षमार्गाः ८ ॥ ॥ ॥ ॥ ॥ ॥

योगीज्ञानी चेत्तिर्हि द्वौ मुनी इत्याह। अरण्य इति। अरण्ये वसतो ग्रामनिष्ठस्य योगिनः ग्रामो वा ह्यं वस्त्र एव तु समीपत एव भवंति योग प्रभावात्सर्वमत्स्यात्सीत्यर्थः ग्रामे लोके वसतो मायापुरद
र्शिन इव हृद्वि चंद्र न्यायेन तद्वाधेनाक्षि द्वान दृष्टिर्नित्यमप्रसुषिता स्तीत्यर्थः ९ द्वय मत्यं त दास्वं यमिति मत्वा एव उतिकथमिति १० आद्यं तीव्रवैराग्य पूर्वकं योगमभ्यस्यतः सुलभ
मित्याह न ग्राम्यमिति ११ द्वितीयं विवेकिनः सुलभमित्याह अनग्निरनिकेत इति। अनग्निः सन्यासी अनिकेतः कुटीचक व्यावृत्तः परमहंसः अत एव अगोत्र चरणः गो

यथा तिष्ठ च अरण्ये वसतो यस्य ग्रामो भवति पृष्ठतः ग्रामो वा वसतोऽरण्ये स मुनिः स्यात्तु नराधिप ९ अष्टक उ च कथं स्विद्वसतोऽरण्ये
ग्रामो भवति पृष्ठतः ग्रामो वा वसतोऽरण्ये कथं भवति पृष्ठतः १० यथा तिष्ठ च न ग्राम्यमुपयुंजीत य आरण्यो मुनिर्भवेत् तथास्य वस
तोऽरण्ये ग्रामो भवति पृष्ठतः ११ अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरं १२ याव
त्प्राणाभिसंधानं तावदिच्छेच्च भोजनं तथास्य वसतो ग्रामेऽरण्यं भवति पृष्ठतः १३ यस्तु कामान्परित्यज्य त्यक्तकर्मा जितेंद्रियः
आतिष्ठेच्च मुनिर्मौनं स लोके सिद्धिमाप्नुयात् १४ ॥

त्रे जन्मवंशः चरणं विद्यावंशः गज च्छाय देश च्छन्नः कौपीनेति स्पष्टार्थं १२ एवं प्रकारेण ग्रामेऽपि वसतो विवेकिनोऽरण्यमेव समीपे स्तीत्याह तथास्येति॥ १३
त्यक्तकामकर्मा जितेंद्रियो मौनं योगविवेकान्यतरदभ्यस्यन् सिध्यतीत्याह यस्त्विति १४ ॥

धौतेतिधौतदंतःशुद्धाहारंआहारशुद्धौसत्वशुद्धिरितिश्रुतेस्तदपेक्षणात्। कृत्तनखत्वक्हिंसाधनं। अतएवसदास्नातंनित्यशुद्धचित्तं। अलंकृतंयोगैश्वर्येणशमा
दिनाच। असितंवासनावंधशून्यं सितकर्माणांहिंसायुक्तंधर्ममपित्यजंतं। यंयंलोकंमनसासंविभातिविशुद्धसत्वः कामयतेयांश्चकामान्। तंतंलोकंजयतेतांश्चका
मांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामइतिश्रुतेः सर्वोपितमर्चितुमर्हतीति ७५ मंदाधिकारिणामादिजयायततयोपिकर्त्तव्यमित्याहतपसेतिः इमंवैराग्येणजित्वात्

धौतदंतंकृत्तनखंसदास्नातमलंकृतं असितंसितकर्माणंकस्तमर्हतिनार्चितुं ७५ तपसाकर्षितःक्षामःक्षीणमांसास्थि
शोणितः सर्वलोकमिमंजित्वालोकंविजयतेपरं ७६ यदाभवतिनिर्द्वन्द्वोमुनिर्मौनंसमास्थितः अथलोकमिमंजित्वालो
कंविजयतेपरं ७७ आस्येनतुयदाहारंगोवन्मृगयतेमुनिः अथास्यलोकःसर्वोयंसोमृतत्वायकल्पते ७८ इ दि वे उ
त्तरपायाते ॥

कंकृत्तपरंस्वर्गंविजयतेप्राप्नोति ७६ मध्यमंप्रतिप्राहयदाभवतिनिर्द्वन्द्वःसुखदुःखमानापमानादिद्वंद्वदुःखरहितःमौनंसमास्थितोध्यानमनुतिष्ठन्नइमंलोकंजित्वा
प्रविलाप्यपरंलोकंब्रह्मविजयतेप्राप्नोति। ७७ उत्तमंप्रतिप्राह आस्येनेतिमुखेनैवाहारंमृगयतेनतुहस्तेसज्जते। एवंमुखवालस्तनयावत्विषयानहस्तेनापिनगृह्णा
तिमनसाप्याचनितिष्ठत्वात्। सचक्षुरचक्षुरिवेत्यादिश्रुतेः। अथास्यलोकःसर्वोपिमात्माभवतिसर्वस्यात्माभवतिसर्वमस्यात्माभवतीतिश्रुतेः। अतस्सोमृतत्वायकल्पते
७८ अध्यायः ॥